र्थी न प्राप्नुतः एवं तर्हि गमेर्ग्रामः कर्म इषेर्गमिः कर्म। एवमपीष्यते ग्रामो गंतुमिति परसाधनत्वसद्यमा
नेनलेनग्रामस्याभिधानं न प्राप्नोति एवं तर्हि गमेर्ग्रामः कर्म इषेरुभे कर्मणी ॥७॥७॥७॥७॥७॥:::

तस्येषिक्रियपो मयमीप्सितं न केवलो ग्रामो नापि केवलं गमनं इत्यर्थः यद्येवमिति इषिकर्मत्वे ग्रामस्य गतिकर्मत्वाभावादिति भावः परसाध
न इति परस्येषेः साधनेयत्वमेव तत्र लकारउत्पद्यते तत्र गमनमेव न तु ग्राम इत्यर्थः एवं तर्हीति इष्यते ग्रामो गन्तुमित्यत्र गमनस्य ग्रामार्थत्वादप्र
धानत्वादिन्नकक्ष्ययोः कर्मणोरेकेन शब्देनाभिधानासंभवात्प्रधाने कार्यं संप्रत्ययात्ग्रामस्येवा भिधानं लकारेण भवति इति क्रियापाश्चात्यस्यान्वाच्य रामः
त्वात्प्राधान्यमिति प्रधानक्रियाश ब्दाभिधाने गु णाक्रियाशक्तेरभिहित वच्चकासनात गमिक्रियापेक्षे द्वितीया चतुर्थ्यौ न भवतः॥७॥७॥७॥ १४

सं२

अप्येति प्रयोगादर्शनाल्लक्षणसङ्गावाच्च एछुनि नभवितव्यमिति एकत्वादिच्छायानस्याश्च सर्वोत्पत्तेनाभिहितत्वादपरः स
त्नभवतीत्यर्थः ननह्रीति इषिगौवधात्तनेच्छायाअभिधानात्सन्न प्राप्नोतीतिभावः एकस्येति इच्छुतीत्यत्रयइषितस्तस्यैषितुमि
त्येतत्पदवाच्यइषिः कर्मेत्यर्थः तथाहि कश्चिदालस्याद्युपहतोऽध्ययनादिविषयामिच्छामेवेति सर्वकालइतिसमानकर्त
केषुतत्सनित्यनेनतुमुनः कालसामान्यविधानात्कोप्यनिष्टः प्रत्ययोनिवार्यते प्रतिव्यक्तिलक्षणप्रवृत्तौवावचनिकोनिषेधः
आकृतिपक्षेतुसकृल्लक्षणप्रवृत्तौतत्प्रवृत्तेः प्राक्तत्वमप्यंतःकृतेसंभवात्तदत्नास्त्यन्ययोत्यात्त्रिर्नभवतीतित्यायाख्यात्तुवादेयः
अथसन्नेतात्सनाभवितव्यं चिकीर्षत्नमिच्छतिजिहीर्षत्नमिच्छतीतिनभवितव्यं किंकारणं अर्थगत्यर्थः शब्दप्रयोगः
अर्थप्रत्याययिष्यामीतिशब्दः प्रयुज्यते नत्रैकेनोक्तत्वात्तस्यार्थस्याऽपरस्यप्रयोगेणनभवितव्यं उक्तार्थानामप्रयोगइ
ति ननहेदानीमिदंभवतिएपितुमिच्छतिशब्दः प्रयुज्यते नत्रैकेनोक्तत्वात्तस्यात्रइष्टेरिषिः साधनंवर्तमानकालश्चप्रत्य
यः अयः अपरस्यवाह्यसाधनंसर्वकालश्चप्रत्ययः इह्यपितर्ह्येकस्येषः करोतिविशिष्टइषिः साधनं वर्तमानकाल
श्चप्रत्ययः अपरस्यवाह्यसाधनंसर्वकालश्चप्रत्ययः येनैवखल्वपिहेतुनाएतद्वाक्यंभवतिचिकीर्षितुमिच्छतीति
तेनैवहेतुनावृत्तिरपिप्राप्नोति तस्मात्सनेतात्सनः प्रतिषेधोवक्तव्यः तेचापिब्रुवताइषिसनइतिवक्तव्यं भवतिहि.
जगमिषतेइति शैषिकात्मत्वर्थीयाच्छैषिकोमत्वर्थिकः सरूपप्रत्ययोनेष्टः सन्नंतात्सननिष्यतेइति इतिश्रीमद्भगव
संपद्यते तत्रशैषिकाच्छैषिकः सरूपोनभवति शालायांभवः शालीयोच्चदः तत्रभवमदकमितिपुनच्छोनभवति वि
रूपस्तुभवति अहिच्छत्रेभवआहिच्छत्रः तत्रभवआहिच्छत्रीयः तथादंडोस्यास्तीति दंडिकः सोस्यास्तीतिपुनष्ठन्नभवति वि
रूपस्तुभवति दंडिमतीसेनेति सन्नंतात्सननिष्यति सरूपइत्येपेक्षते सारूप्येणचात्रसादृश्यंलक्ष्यतेतत्त्वार्थद्वारकमितीच्छास.

३

२
भा॰ कै॰
१५

सुपआत्मनः किमर्थइति वक्ष्यमाणोभिप्रायः शिष्यबुद्धिपरीक्षार्थं परिहाराभासमाह चित्तइति प्रत्ययस्वरेणेति युग्यगन्तथानुस्वरेणभा
वैन तथापि पूर्वप्रत्ययस्वरोभवति यस्मात्तजिष्ठोधातुस्वरइतिक्रमः तदन्तबंधकेति सपदस्यान्तबंधः तस्यग्रहणायस्यन्तसचान्तस्य
तस्यन ग्रहणमित्येवमेतद्वचनसामर्थ्यादाश्रीयेत आत्मेच्छायामिति आत्मनइच्छेतिशेषषष्ठ्यासमासः नत्वकर्तृषष्ठ्यासंबंधेन॥

सुपआत्मनःक्यच् किमर्थश्चकारः स्वरार्थः चित्तोंतउदात्तोभवतीत्यंतोदात्तत्वं यथास्यात् नैतदस्तिप्रयोजनं एकाजयं
नत्रनार्थःस्वरार्थेनचकारेणन्तबंधेन प्रत्ययस्वरेणैवसिद्धं विशेषणार्थस्तर्हिक्कविशेषणार्थेनार्थः अस्यश्चोक्यविधे
ति काइतिहुच्यमानेऽपिकाकः श्येनायतेअत्रापिप्रसज्येत नैतदस्ति तदन्तबंधकग्रहणे अनदन्तबंधकस्यग्रहणं ने
त्येवमेतस्यनभविष्यति सामान्यग्रहणाविघातार्थस्तर्हि क्वचसामान्यग्रहणाविघातार्थेनार्थः नःक्यइति अथात्म
ग्रहणंकिमर्थं आत्मेच्छायांयथास्यात् परेच्छायांमाभूत् राज्ञः पुत्रमिच्छतीति क्रियमाणेऽपिवैआत्मग्रहणेपरेच्छा
यांप्राप्नोति किंकारणं आत्मनइतीयंकर्तरिषष्ठीइच्छेत्यकारोभावे सयश्चैवात्मनइच्छति अथापिपरस्यात्मनए
वेच्छासोभवति नैषदोषः नात्मग्रहणेनेच्छाभिसंबध्यते किंतर्हिसुबंतमभिसंबध्यते आत्मनोयत्सुबंतमिति यद्यात्म
ग्रहणंक्रियतेऽकुंदस्तिपरेच्छायांनप्राप्नोति मान्वाहकाअध्यायवोविदन तस्मान्नार्थ आत्मग्रहणेन कस्मान्नभवतिराज्ञः
पुत्रमिच्छतीति असामर्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थंभवतीति छंदस्यपितर्हिनप्राप्नोति मान्वाहकाअध्यायवो
विदन् अस्त्यत्रविशेषः अंतरेणाप्यत्रत्वनीयस्यपदस्यप्रयोगंपरेच्छागम्यते कथंपुनरंतरेणाप्यत्रत्वनीयस्यपदस्यप्रयो
गंरकस्मात्मनइच्छयासंबंधः नत्वसाक्षात्तेनायमर्थः आत्मनः स्वकीयस्यपदेच्छतिनदायषष्ठ्यास्यादिति एवंपरेच्छायामितिव्याख्येयं
आत्मनइतीयमितिक्रियाकारकसंबंधलक्षणात्वादितिभावः नात्मग्रहणेनेति आत्मग्रहणोपादानसामर्थ्यात् नह्येषितारमेन

१५

कस्यात्मनइति अहंव्यसनेदुःखमनुभवते नह्यात्मनो नकश्चिदिच्छतीत्यर्थः यदयमिति नवनदाचारक्यजर्थेछंदस्यचशब्दाच्चारेक्यचम ।
कस्यात्मनःअच्चमेषितुमर्हइति अतोंतेरांणापितनीयस्यपदस्यप्रयो नं परेच्छागम्यते यथैवतर्हिछंदस्यचशब्दात्परेच्छायां
क्यच् भवति एवंभाषायामपिप्राप्नोति अचमिच्छतीति तस्मादात्मग्रहणंकर्तव्यं छंदसिकथं आचार्यप्रवृत्तिर्ज्ञापयति भवत्य
चशब्दात्छंदसिपरेच्छायांक्यजिति यदयमाह अश्वाघस्यादिति क्यचिप्रकृतेइत्ववायनार्थ आकारंशास्ति अथसुपग्र
हणंकिमर्थं सर्वनाडुत्पत्तिर्यथास्यात् प्रातिपदिकान्माभूदिति नैतदस्तिप्रयोजनं नास्त्यत्रविशेषः सर्वनाडुत्पन्नेभ्यःस्यात्प्रा
तिपदिकाद्वा अयमस्तिविशेषः सर्वनाडुत्पन्नेभ्यःसत्यांप्रातिपदिकाद्वा अयमस्तिविशेषः सर्वनाडुत्पन्नेभ्यःसत्यांपदसत्यांपदसंज्ञा
सिद्धाभवति प्रातिपदिकात्पुनरुत्पन्नेभ्यःसत्यांपदसंज्ञानप्राप्नोति ननुचप्रातिपदिकादप्युत्पन्नेभ्यःसत्यांपदसंज्ञासिद्धा कथं आ
रभ्यतेनःक्यइति नह्यावश्यंवक्तव्यं सर्वनाडुत्पन्नेभ्यःसत्यांनियमार्थं तदेवप्रातिपदिकादुत्पन्नेभ्यःसत्यांविपर्ययार्थंभविष्यति इदंतर्हि
प्रयोजनंसर्वनाडुत्पत्तिर्यथास्यात् धातोर्माभूदिति एतदपिनास्तिप्रयोजनं धातोःसन्विधीयते सबाधकोभविष्यति अनव
काशाद्विविधयोबाधकाभवंति नसावकाशः सावकाशश्चसन् कोवकाशः परेच्छानपरेच्छायांसना भवितव्यं किंकारणं ।
समानकर्तृकादित्युच्यते यावच्चेहात्मग्रहणं तावच्चानत्रसमानकर्तृकग्रहणं इदंतर्हिप्रयोजनं सर्वनाडुत्पत्तिर्यथास्याद्वा
क्यान्माभूदिति महान्तंपुत्रमिच्छति नवाभवतिमहापुत्रीयतीतिभवति यदिएतद्वाक्यंभवति महान्पुत्रो महापुत्रः महापुत्र
मिच्छतिमहापुत्रीयतीति यदात्वेतद्वाक्यंभवति महान्तंपुत्रमिच्छतीति तदानभवितव्यं तदाचप्राप्नोति तदामाभूदिति अ
पक्रियमाणेपिसुपग्रहणेकस्मादेवात्रनभवितव्यं सर्वतेह्येतत्भवतिवाक्यं नैतत्सर्वतः कथंप्रत्ययग्रहणेयस्मात्
योगाभावादितिभावः महान्तंपुत्रमिच्छतीति यद्यत्रसुवंतसमुदायात्क्यच्प्रत्ययःस्यात् तदाप्रत्ययार्थाभिधानेपदद्वयस्यप्रवर्तमानात्परस्य

[illegible]

नदादेर्ग्रहणंभवतीति अथपदत्रसर्वनेनस्मा
रस्यसमासाभावादुत्तरपदनिबंधनमात्वंनस्यात् ॥

द्वा°

समानाधिकरणानामिति समानाधिकरणानां पदानां मध्ये एकेन पदेनायोगात्समुदायेनैव योगान्न वृत्तिर्न भवतीत्यर्थः सगुणस्य हि शत्रेरस्य
विशेषणसंबंधो न केवलस्येति भावः द्वितीयानुपपत्तिस्त्विति यदि केवलस्य प्रातिपदिकार्थस्य विशेषसंबंधो नेष्यते तदा कर्मत्वाभावात्केवला

२ भा॰ कै॰ समानाधिकरणानां सर्वत्रावृत्तिरयोगादेकेन समानाधिकरणानां सर्वत्र वृत्तिर्न भवति क्व सर्वत्र समासविधौ प्रत्ययविधौ च
१९ समासविधौ तावत् ऋद्धस्य राज्ञः पुरुषः महत्कष्टं श्रित इति प्रत्ययविधौ ऋद्धस्योपगोरपत्यमिति महान्तं पुत्रमिच्छतीति किं का
16 रणं समानाधिकरणानां सर्वत्र वृत्तिर्न भवतीति अयोगादेकेन न ह्यत्रैकेन पदेन योगो भवति इह तावत् ऋद्धस्य राज्ञः पुरुष
इति षष्ठ्यन्तस्य सत्त्वेन सामर्थ्ये सति समासो विधीयते यच्चात्र षष्ठ्यन्तं न तस्य सत्त्वेन सामर्थ्यं यस्य च सामर्थ्यं न तत् षष्ठ्यन्तं श्री
वाक्यं न तत् ऋद्धस्योपगोरपत्यमिति षष्ठीसमर्थादपत्येन योगे प्रत्ययो विधीयते यच्चात्र षष्ठ्यन्तं समर्थं न तस्यापत्येन योगो
न तत् षष्ठीसमर्थं वाक्यं न तत् समानाधिकरणानामित्युच्यते अथ कथं व्यधिकरणानां राज्ञः पुत्रमिच्छतीति एवं तर्हि इदं प
ठितव्यं सविशेषणानां सर्वत्रावृत्तिरयोगादेकेनेति द्वितीयानुपपत्तिस्तु द्वितीया तु नोपपद्यते महान्तं पुत्रमिच्छतीति किं
कारणं न पुत्र इष्टिकर्मा यदि पुत्र इष्टिकर्मा न चावयवे द्वितीयैव किं तर्हि सर्वाः अत्र द्वितीयादयो विभक्तयो न स्युः महता
पुत्रेण कृतं महते पुत्राय देहि महतः पुत्रादानय महतः पुत्रस्य स्वम् इति पुत्रे निधेहीति तस्मान्नैतच्छक्यं वक्तुं न पुत्र इ
ष्टिकर्मेति पुत्र इष्टिकर्म न तत्सामानाधिकरण्यान्महतोऽपि द्वितीया ह्ययो भविष्यति वृत्तिस्तर्हि कस्मान्न भवति ॥

प्रातिपदिकाद्द्वितीया न प्राप्नोति नापि समुदायात्तस्याप्रातिपदिकत्वादेकत्वसंख्याया विवक्षितत्वात् पुत्र एवेति तस्येवेष्यमाणत १९
मत्वात्तद्गुणानां चेष्याप्रकर्षाभावात् स्वयमकर्मत्वेऽपि तत्सामानाधिकरण्यनिबंधना विभक्तिरित्यर्थः ॥

वादितिभावः ॥

सविशेषणानामिति एकस्यैकदाव्ययेस्तैकार्थीभावविरोधादिति भावः आगमकत्वादिति लौकिके प्रयोगे तन्मानादपि गणादिभ्यो गवाद्यर्थप्रतिपत्तिभवत् महान्तं पुत्रमिच्छतीत्यादिवाक्यार्थस्य महान्तं पुत्रीयतीत्यादेः प्रतीतिर्नास्तीत्यर्थः सिद्धानां च शब्दानां संकरनिरासाय अन्वाख्यानं क्रियते ननु प्रयुक्तापूर्वशब्देष्वनुत्पादनाय न क्रम इति अपशब्दो हि लोके प्रयुज्यते साधुशब्दसमाना

सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यं यदि तर्हि सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति उच्यते मुण्डयति न वृत्तस्य वा विमाणवकं अत्र वृत्तिर्न प्राप्नोति एवं तर्हि मुण्डादीनामिति वक्तव्यं सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते अमुण्डादीनामिति न वक्तव्यं वृत्तिस्तर्हि कस्मान्न भवति महान्तं पुत्रमिच्छतीति अगमकत्वात् इह समानार्थेन वाक्येन भवितव्यं प्रत्ययान्तेन च यश्चेहार्थो वाक्येन गम्यते महान्तं पुत्रमिच्छतीति नासौ जातुचित्प्रत्ययान्तेन गम्यते महान्तं पुत्रीयतीति एतस्माद्धेतोर्न्नमः आगमकत्वादिति न क्रमः अपशब्दः स्यादिति यत्र च गमकं भवति तत्र वृत्तिस्तद्यथा मुण्डयति माणवकमिति अथास्याकाजेनस्य कानि साधनानि भवन्ति भावः कर्ता च अथ कर्म नास्ति कर्म ननु चायमिषिः सकर्मकः यस्यायमर्थेकश्चिदीप्सितः अभिहितं तत्कर्मान्तर्भूतं धात्वर्थसंपन्नः न चेदानीमन्यत्कर्मास्ति येन सकर्मकः स्यात् ॥ प्र ॥

थैश्च अयेन प्रयुक्तत्वादयः शब्दव्यपदेशस्यापि न भाजनमित्यर्थः भावः कर्ता चेति कर्माभावेति पादनपरमेतत् अपि करणादौ हि ल्युडादयो यथायोगं भवन्त्येव भावस्य लकाराणां त्पत्तिनिमित्तत्वात्साधनव्यपदेशः अभिहितमिति तत्र आजीवतीत्यादिस्याकाजेनस्याकर्मकत्वात्कर्मासिलाद्यभावः न चेदानीमिति नियतविषयायाः इच्छायाः का जं तेन प्रतिपादनान्नस्यात्स्वकर्तृत्वं नारविषयीकरणाभा

कथंतर्हीति अत्रापिद्वत्रकर्मणोरन्तर्भाव इतिप्रश्नः द्वेइतिवाक्यएवकर्मद्वयकामोक्तिमित्यर्थः मंडयतीति मंडगणविशिष्ट

ऊ.
भा. कै.
८
17

कथंनह्ययंसकर्मकोभवति अत्रउत्रमिवाचरतिउत्रीयतिमाणवकमिति अस्यत्रविशेषः द्वेह्यत्रकर्मणीउपमान कर्मोपमेयकर्म्मच उपमानकर्म्मान्तर्भूतउपमेयेनकर्म्मणासकर्मकोभवति नचयथा अपिकाकःश्येनायतइति अत्रद्वौकर्तारौउपमानकर्ताउपमेयकर्ताच उपमानकर्त्तान्तर्भूतःउपमेयकर्त्तासकर्मकोभवति अथतर्हिकथंसकर्म कोभवति मंडयतिमाणवकमिति अत्रापिद्वेकर्मणीसमान्यकर्मविशेषकर्मच सामान्यकर्मान्तर्भूतविशेषक र्मणासकर्मकोभवति ॥

व्यकर्मणोयान्वर्थेन्तर्भावादितिभावः अत्रापीतिएपंनोपानईव्यमात्रमंतर्भावयितुंशक्नोति नतुविशेषंमाणवकादिक। सिनिभावः ८

नन्वेवेति यद्यप्येतच्चोदितं चपरिहृतं चतथापि गमकत्वागमकत्वविषयविभागप्रदर्शनायपुनरुपन्यासः नाग्नेर्भावितेति मौंड्यमेवकरोतिपुत्रकमिति मौंड्यं करोतीत्येवेवार्थे मुंडयतीति ह्यिच्चतुस्यादितद् तथ्यीः मुंडं करोतिमाणवकमित्यत्रतुवाक्येकर्मत्वमेक [redacted] स्येवतत्सामानाधिकरण्यान्न हिती यस्मात् [redacted] द्वितीया न्यायतिः गुणवचनमावस्त्वविवक्षायांवशादिनिय तदतिमाणा वकादयो मौंड्याधारविशेषप्रतिपत्यर्थमुपादीयमानाः करोति प्रयुक्ताभवंतीत्यर्थः मुंडयतेस्त्वक्रियाविशेषवाचित्वान्नदपेक्षंमाणवकादेः कर्मत्वमिति [redacted] माणवकंमुंडयतीत्यादि प्रयोगोपपत्तिः तथ यथेति वल्लीवर्द्धमेवात्मसंबंधित्वेनकरोतितच्चमुंडं करोतीतिप्रयोगप्रतमयोः करोतिकर्मत्वेविशेषितेमुंडयतिवल्लीवर्द्धमितिप्रयोगोनभवतीत्यर्थः कामं नहीति अत्रापि मौंड्यमेवेष्यत इति

च१ नन्वेवमेवात्रनभवितव्यं किंकारणमसामर्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति नैषदोषः नाग्नेर्भौकरोतियुक्तौमुंडोमाणवकस्य
नहिमाणवकत्वं क्रियते यदाचोभौकरोतियुक्तौभवतः नभवति तदाप्यतिः तद्यथा वल्लीवर्द्दंकरोतीति कामंतस्येनेनैवहेतुनाकाज्जितिमुंडं चैनं करो २
तिकर्तव्यः माणवकंमुंडमिच्छतीति नोभाविषियुक्ताविति नकर्तव्यः उभावत्रेषियुक्तौमुंडोमाणवकस्त्वाकथं नह्यसौमौंड्यमात्रे
णासंतोषंकरोतिमाणवकस्यमसौमौंड्यमिच्छति इहापिर्हि नप्राप्नोतिमुंडयतिमाणवकमिति अत्रापियुक्तौकरोतियुक्तौमुंडोमाण
क२ वकस्त्व नह्यसौमौंड्यमात्रेणासंतोषंकरोतिकिं तर्हिमाणवकस्यमसौमौंड्यंनिर्वर्त्तयति एवंतर्हिमुंडादयोगुणवचनाःगुणवचनाश्च
सापेक्षाः तत्रवचनात्सापेक्षाणांवृत्तिर्भविष्यति अथवाधातवएवमुंडादयः नचैवमयुक्ताश्चादिशंपते क्रियावचनताचगम्यते॥५४॥

माणवकस्यतदाधारविशेषप्रतिपादनायोपादानमितिभावः उभावत्रेति माणवकस्यमौंड्यकरणेनसंस्कार्यत्वादुभयोःकर्मत्वेसापेक्षत्वादेकान्तरत्वमाश्रययोगत्वात्तिर्भवतीत्यर्थः गुणवचनाश्चेति
वचनसामर्थ्यात्सापेक्षेभ्योपिमुंडादिभ्यः प्रत्ययोभवतीतत्वच्छतप्यपत्तनिरपेक्षेभ्यः पुत्रादिभ्यः माणवकाश्चइतिमाणवकंमुंडमिच्छतीत्यादौसापेक्षेभ्योनभवति ननुपद्मपिपिगानुगुणमात्रविवक्षायांसावकाशोमुं
डयपपन्नापितः यथोमौंड्यकरणस्यथावगमात्ततस्त्वद्रव्यविशेषापेक्षायोनप्राप्नोतिनैषदोषःकरोतीतिसिद्धेगतिचित्रनर्द्दिधानमिदंसापेक्षेभ्योपिमुंडादिभ्योयथास्यादित्येवमर्थमेव अतएवेति
प्रोत्तराधातवोमुंडादयस्ते भयमुदादिवत्तार्थिकोणिज्ञित्यर्थः नचैवेति यद्यपिक्रियाविशेषाभिधायित्वंमुंडादीनांनैतेषातेयापिक्तार्भविकत्वादर्थाभिधानस्यप्रयोगादेवगतत्वसीयतइत्यर्थः यथाचकंद्वारयोर्हिवि

=सापेक्षेभ्यपीति-गुणस्यगुणिनापेक्षत्वेपिगुणिषतितेनायस्यान्नसाभावानुनाभिति निसमसाकांक्षत्वमिति देवदत्तस्यकुलमितिव ३ इति स्यादितिनयंकानीपं पंचालानांयोनाजातस्यकृपस्येवपंचालानांनाजपुत्रस्यापनेः राजकस्वानि=
=केन स्वनिरूपितत्वमित्यर्थिनेत्यर्थः नसाद्यस्यान्नकसाकांक्षसापेक्षताभावः देवदत्त पेक्षा२ स्युरपुत्रसंनिसत्वरत्वादिपाद्यागनजनकांक्षा र णकर्तत्वस्यमित्यर्थमति गुणस्यमाद्यस्यासतादिनित्यसापेक्षत्वमितिदिशोषमाशवः॥३=

ग्र

भा०के३० मुंडविशिष्टेनेति एवंस्मिन्परिहारेकर्मविशेषानपेक्षायांप्रत्ययोत्पत्तिरित्युक्तं अस्मिंस्तुपक्षेगौरवधिप्रत्ययइतिस्फुटमत्र इहेगवाशब्दसंबंधःपश्चात्तुगोडहिनाप्रत्ययः एवंमुंडःकरोतिमौंड्यं तत्संब
१८
१४
ध्नतेमौंड्यविशिष्टस्तमाणवकेनत्युच्यते अनेनैवन्यायेनमाणवकंमुंडमिच्छतीतिक्यज्प्राप्तोतीत्याशंक्याह अथवेति व्यापारेणाम्रपणापञ्चप्रत्ययमत्रेणाप्येतसिद्धवादित्यर्थः कान्त्व स्य२
मकत्वान्नभवति तदुक्तंहरिणा मैवंपीड्यंतायाःकर्मत्वंपाचारकल्याणइत्वबाकवाच्यमन्तोपपत्तेर्यथाम्पमःक्रमादिषिति अथेहेति इच्छासंतत्वात्कर्मणिप्रत्ययोस्त्विति प्रकारांतरेणाशंकतेनेत्या
हिपयपत्रकाजूभवतितदिच्छामात्रस्यकाणाभिधानात्स्वरूपंकर्मणोभिधानायतद्विनाप्रत्ययेनोत्पन्न वं पर्याप्तन्नीयतीतिक त्वेभिधानापत्तिणास्वशब्देनेति इष्टशब्दसामानाधिकरण्या

अथवानेदमभ्यर्थम् गपदूवत्तिगकंचप्रत्ययपक्षे पदाणाकांनत्तत्वाप्रत्ययः पदाप्रत्ययः सामान्येन तदाद्वन्निर्भवति तत्रावयवविशेषार्थिनाविशेषोनुप्र
योक्तव्यःमुंडयतिकंमाणवकमिति मुंडविशिष्टंनवाकरोतिनानमात्रमिच्छति अथयोक्तमेतत्तत्रावव्यापारेनुगंतव्यः गमकत्वादिहवृत्तिर्भविष्यतिमुं
डयतिमाणवकमिति अथेहकस्मान्नभवितव्यं इष्टःपुत्रः इष्यतेपुत्रःकेचिन्नाववदाङ्कः नभवितव्यमिति किंकारणं स्वशब्देनोक्तत्वात् अपरआङ्कःभवितव्यमि
ति किंकारणं धात्वर्थेयंक्यज्विधीयते सचधात्वर्थःकेनचिदेवशब्देननिर्दिष्टव्यइति इहभवंतस्त्वाववदाङ्कः नभवितव्यमिति किंकारणं समानार्थेनवाक्येन
भवितव्यंप्रत्ययांतेनच पश्येहार्थोवाक्येन [redacted] गम्यते इष्टःपुत्रःइष्यतेपुत्रइतिनाप्यर्जेत्तुचिन्त्यप्रत्ययांतेनगम्यते कांचिमांताम्यप्रतिषेधः
कांचिमांताम्यपानांप्रतिषेधोवक्तव्यः इहमाभूत इदमिच्छतिकिमिच्छतिउच्चैरिच्छति [redacted] नीचैरिच्छतीति गोसमानाक्षरनांतादितिकेच
क्यमिस्याङ्कः गामिच्छतिगव्यति समानाक्षर घ दीर्घनिर्दधायतिमध्व्यतिकर्त्रीयति नांतात् राज्ञीपतितक्षीयति ॥ ॥ रामायनमोनमः

पुत्रइस्यनेननिर्दिष्टक्रियापेक्षकर्मभावस्यार्थस्यप्रतिपादनादित्यर्थः अयमर्थः यदाक्रियाफलस्यकर्मणःप्राधान्यंप्रतिपिपा दयिषितंतदावाक्यमेवप्रयुज्यते पुत्र
इष्टइत्यादिनतुक्यजंतःतस्याकर्मकत्वात्कर्म णिप्रत्ययानुत्पादात् सचधात्वर्थइति इच्छायाःप्राप्यत्वं प्रदर्शयितुंवाक्यमुपादेयं तत्रवाक्येकर्तृप्रत्ययः प्रयुज्यताकर्मप्रत्ययोवा
प्रत्ययेतुसत्त्वेऽकर्मकत्वात्कर्मे प्रत्ययोनभवति नाप्तोजातुविदिति प्रत्ययांतस्याकर्मकत्वात्कर्मणिप्रत्ययोत्पत्त्यसंभवादित्यर्थः गोसमानाक्षरेति अकारादयोदशसमानाःत राम:
तत्वर्गांतस्यप्रातिपदिकस्यासंभवादुक्तावाणांस च [redacted] समानोग्रहणं अस्मिंस्तुन्यासेव्याप्तिः वाव्यतीत्यापि सिद्धिप्रसंगात भाष्यकारेणात्वमतभेद प्रदर्शनायोयन्यासि ५ १८

काम्यच्च आदित इति अनेपि कृत आदिकृतफलसंपादनादादितः संपद्यते तथाहि यदादौ क्रियते तदा ककारस्यानादित्वादितसं
ज्ञा न भवति एवमनेपि कृतस्मिन्कार्ये नोदात्तत्वे सिद्धे नियमार्थः संपद्यते क्विदेवार्थं व्यपदेष्टव्यः नन्वनुबंधांतरेणकिदिति य

काम्यच्च किमर्थस्थकारः स्वरार्थः चित्रोंत उदात्तो भवतीत्यंतोदात्तत्वं यथास्यात् नैतदस्ति प्रयोजनं धातुस्वरेणाप्येत
त्सिद्धं ककारस्य तर्हीत्संज्ञापरित्राणार्थः आदितस्थकारः कर्तव्यः अतउत्तरं पठति काम्यचश्चित्करणमनर्थकं ककारे
दर्थाभावात् काम्यचश्चित्करणमनर्थकं ककारस्येत्संज्ञाकस्मान्नभवति इदर्थाभावात् इत्कार्याभावादत्रेत्संज्ञा न भवि
ष्यति ननु च लोप एव वेत्कार्ये अकार्यः लोपः इह हि शास्त्रस्य कार्यार्थो वास्यादुपदेशः श्रवणार्थो वा कार्यं चेह नास्ति अ
सति कार्ये यदि श्रवणमपि न स्यात् उपदेशोनर्थकः स्यात् इदमस्ति कार्यं अग्निचित्काम्यति किनीति गुणप्रतिषेधो य
था स्यात् नैतदस्ति प्रयोजनं सार्वधातुकार्धधातुकयोरंगस्य गुण उच्यते धातोश्च विहितः प्रत्ययः शेषः आर्धधा
तुकसंज्ञां लभते न चायं धातोर्विधीयते इदं तर्हि प्रयोजनं उपयट्काम्यति किनीति संप्रसारणं यथा स्यात् एत
दपि नास्ति प्रयोजनं यदादिभिरत्र किं न विशेषयिष्यामः यजादीनां यः किं दिति कश्च यजादीनां कित् यजा
दिभ्यो विहितः अथापि कथंचिदित्कार्यं स्यात् एवमपि न दोषः क्रियते न्यास एव द्विचकारो निर्देशः स्यप आत्मनः
क्यच् च काम्यच्चेति अथवा छांदसमेतत् दृष्टानुविधिः छंदसि भवति न चात्र संप्रसारणं दृश्यते तस्मान्न कर्तव्यश्च

जादिभ्यो यो विहित इति अयं तु सर्वेनाद्विहितः अथापीति यदा यजादिभिः किं त्र विशेष्यते कार्यित्वे नैव यजादयो निर्दिष्टं
त इति भावः अथवेति विज्ञये छंदसीति विव छंदसि विधानात् इहवा काम्यतीति संप्रसारणं किन्कार्यमस्ति तस्मान्नूर्वपरि

उपमानात्क्यचामिति उपमेये सप्तमी अवगतो उपमानमपि समस्तमिति कर्मविवक्षायामेतत् प्रयोगासंभवात् वार्त्तिकारंभः क

२ भाकै. १५ 19 र्त्तुः क्यङ् सलोपविधौ कर्त्तुरिति स्थानषष्ठी सकारेण कर्त्तुर्विशेषणात्तदंतविधिसद्भावात् हंसायत इत्यादौ सलोपाभावः स

उपमानादाचारे अधिकरणाच्च अधिकरणाच्चेति वक्तव्यं इहापि यथा स्यात् कुटीयति प्रासादे प्रासादीयति कुट्यां
कर्त्तुः क्यङ् सलोपश्च सलोपसन्नियोगेनायं क्यङ् विधीयते तेन यत्रैव सलोपस्तत्रैव क्यङ् स्यात् पयायते इत्यत्र न स्यात्
अपि काकः श्येनायते नैतद्दृष्टिप्रधानशिष्टः क्यङ् अन्वाचयशिष्टः सलोपः यत्र च सकारं पश्यसीति तद्यथा क
श्चित्कंचिद्ग्रामे भैक्षं चर देवदत्तं चानय स ग्रामे भैक्षं चरति यदि च देवदत्तं पश्यति तमप्यानयति सलोपो वेति वक्तव्यं
पयायते पयस्यते ओजसोऽप्सरसो नित्यं ओजसोऽप्सरसो नित्यं सलोपो वक्तव्यः ओजायमानो योऽहिं जघान अप्स
रायते अपर आह सलोपोऽप्सरस एव पयस्यतेत्येवं भवितव्यं कथमोजायमानो योऽहिं जघानेति छांदसत्वा
त्सिद्धं आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा वक्तव्यः अवगल्भते अवगल्भा
यते विक्लीबते विक्लीबायते विहोडते विहोडायते किं प्रयोजनं क्रियावचनता यथा गम्येत नैतदस्ति प्रजननम्
धातवश्चावगल्भादयः

लोपसन्नियोगेनेति एकवाक्यतां सन्नियोगं व्यर्थं च च शब्दं मत्वा चोद्यते वाक्यभेदमन्वाचये च च शब्दमाश्रित्य परिहारः अप
र आहेति मतभेदप्रदर्शनायोपन्यासः नन्वयं स्थितः यदा इत्याह क्रियावचनतेति आचारलक्षणक्रियावचनतेत्यर्थो
विवक्षितो धातुपाठे हि पाठात्तेषां क्रियावचनतासिद्धैव ॥ ॥ ॥ १५

नचैवं ह्यीति अनेकार्थत्वाद्धातूनां भाषायां क्रियावृत्तित्वस्य सिद्धत्वादित्यर्थः अश्वतीति प्रातिपदिकाद्वायं क्विब्विधीयते न सर्वं
नाम्नेन पदत्वाभावादतो गणइति परस्मैपदत्वं भवति यत्तु सर्वेभ्य इति वक्तव्ये सर्वप्रातिपदिकेभ्य इति वचनाल्लभ्यते आत्मनेपदा
र्थानिति वाक्ये ऽकारस्यानुदात्तत्वानुनासिकत्वे प्रतिज्ञाते इति भावः भृशादिभ्यो हलइति हलां भृशादयो विशेष्यन्ते तेन हलन्ता
नचैवं ह्यर्थी आदिश्यते क्रियावचनता च गम्यते इदं तर्हि प्रयोजनं अवगल्भा विक्लीबा विहोडा अप्रत्ययादित्यकारप्रत्य॰
यो यथा स्यात् माभूदेवं गोशब्द हलइत्येवं भविष्यति इदं तर्हि प्रयोजनं अवगल्भांचक्रे विक्लीबांचक्रे विहोडांचक्रे कास्प्रत्यया
दाममन्त्रे लिटीत्याम् प्रत्ययो यथा स्यात् अप आह सर्वप्रातिपदिकेभ्य आचारे क्विब्वक्तव्यः अश्वति गर्दभतीति नैवमर्थं न
तर्हीदानीं गल्भाद्यनुक्रमणं कर्तव्यं कर्तव्यं च किं प्रयोजनं आत्मनेपदार्थानन्तु वैधाना संहृपामीति गल्भक्लीबहो॰ भृ॰
शादिभ्यो हलो लोपः सन्नियोगेनायं क्यङ् विधीयते तेन यत्रैव हलो लोपः तत्रैव प्राप्नोति नैष दोषः प्रधानशिष्टः क्यङ् अ
न्वाचयशिष्टो हलो लोपः यत्र च लोपसंभवीति भृशादिष्वभूततद्भावग्रहणं भृशादिष्वभूततद्भावग्रहणं कर्तव्यं इह माभूत् क्ष
दिवा भृशा भवन्तीति क्विप्रतिषेधानर्थक्यं च भवत्यर्थे क्यङ्वचनात् क्विप्रतिषेधस्यानर्थक्यः किं कारणं भवत्यर्थे क्यङ्वचनात्
भवत्यर्थे क्यङ् विधीयते भवतियोगे च्विर्विधानेभवति नायोगे च्विर्विधीयते तत्र च्विनोक्तत्वात्तस्यार्थस्य क्यङ् न भविष्यति डा
जेनादपि तर्हि न प्राप्नोति पठ्यते डाजपि हि भवतियोगे विधीयते भवत्यर्थे क्यश् विधीयते डाचि वचनप्रामाण्यात् ॥
नामेव क्यङ् लोपाभ्यां भवितव्यमित्यर्थः प्रधानशिष्ट इति वाक्यभेदेन सर्वेभ्यो भृशादिभ्यः क्यङ् विधाय हलन्तानां लोपो विधीयत
इत्यर्थः अन्वयानर्थकः पाठः स्यादहलन्तानां क्षदिवा भृशा भवन्तीति येरात्रौ भृशा आलोकानक्षत्रादयस्ते दिवसे क्षप्रदेशे भवं
तीत्यत्राभूततद्भावाभावः च्विनोक्तत्वादिति च्विसहचरितेन न भवतीत्यर्थः डाचि वचनप्रामाण्यादिति ॥ ॥

२
भा॰ कै॰
२॰
20

अप्रयुक्त एव भवतो भवत्यर्थविवक्षायां वचनप्रामाण्यात्तु ढं विधाय भवत्यर्थे क्विप् द्वितीयत इत्यर्थः यथान्यासमिति अन्वेवेति पर्युदा
सान्वयेन दोषद्वयस्यापि परिहार इत्यर्थः इह कस्मिंश्चिदिति यदा मनःशब्देनाममस्ताप एवं स तु उभय इति पक्षस्तदा प्रत्ययार्थविशेष
णेन भवति मनसः शब्दस्य वृत्तिविषयेन वृत्तिवर्त्तते मनस्वी सह भवति नहि भवति उहि भवति आभिमुख्येन भवतीत्यत्रार्थे
श्रोतिविवचनप्रामाण्यात् भविष्यति किं वचनप्रामाण्यं एवं हि नादिग् अन्यः काम इति इह किंचित् क्रियमाणं चोद्यते
किंचित्तु क्रियमाणं प्रत्याख्यायते सत्र भेदः कुतो भवति यथान्यासमेवास्तु ननु चोक्तमिह कस्मान्न भवति क्वचिदि
वाभ्यां भवतीति नन्वेव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः नन्वयुक्तमिव युक्तं यत् किंचिदिह दृश्यते न
तु अन्ता अन्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते यथा अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृश एव वा
नीयते नासौ लोष्टमानीय कृती भवति एवमिहाप्यत्वेरिति त्वि प्रतिषेधादस्मिन्नत्वन्ते त्विसदृशे कार्यं विज्ञायते किं
चान्यदतोऽत्वन्ते त्विसदृशं इह कश्चिन्न कृतयः सोपसर्गाः पठ्यन्ते अभिमनस् समनस् उन्मनस् तत्र विचार्यते भृशा
दिषूपसर्गाः प्रत्ययार्थविशेषणं वा स्यात् अभिभवतो संभवतो उद्भवतो दुर्भवताविति प्रकृत्यर्थविशेषणं वा अभि
मनसशब्दात् उन्मनःशब्दात् दुर्मनसशब्दाद्वेति युक्तं तु नृदं विचारयितुं नन्वनेनासंदिग्धेन प्रकृत्यर्थविशेषणे
न भवितव्यं यावता प्राक् प्रकृतेः पठ्यन्ते यदि प्रत्ययार्थविशेषणं स्युः प्राग्भवतेः पठेरन् नेमे शक्याः प्राग्भव
तेः पठितुं एवं हि विशिष्टप्रत्ययार्थस्य प्रादिमात्राद् उत्पत्तिः प्रसज्येत तस्मान्नैव शक्यं न चेदेवं जायते विचारणा
काऽद्यापि अन्ये त्वाहुः प्रास्यर्थस्यापि वृत्तिविषये भवतेर्ग्रहणं तेन मनः कर्मणो भवतेः प्राप्नोतीत्यादिरर्थः काऽत्र तस्य भवति य
दा तु मनःशब्देन स्वादीनां बहुव्रीहिरिति पक्षः तदा प्रकृत्यर्थविशेषणेन भवतीति विचारः क्रियते प्राक् प्रकृतेरिति प्रकृते २॰

विधानमिति मनः श्रद्धानक्वाङ्. कृते समनायन इत्यस्य तिङः तस्य पदस्यातिङः नात्वादेः यदा सद इत्यादुत्तरत्वात् प्रकृत्यर्थविशेषणात्तेन समम
नायत इत्यादि तिङः ते सेयतत्र इतिनन्वतितिकृ पदान्तराभावान्निघाताभावः उपसर्गस्य तु यान्तर्भावात्ततः श्रवमङादौ प्राप्नुतः क्वाङः तेन तस्या
नुप्रवेशात्तद्यतिरिक्तपदाभावात्समासाभावा — यो: प्रसंगः कृताङः नाद्य समनिकृते सोपसर्गस्य द्विर्वचनप्रसंगः अवश्यमिति ग्रामशब्द एव
युद्धे वर्तते सामान्यतो दृष्टाद्वानुमानात् क्रियाविशेषणस्य द्योतकः संशब्दः तथा च वाप्यदातेरेव नि परस्य वर्णविकल्पो भवति उपसर्ग
तिङ्तिङ्इति निघातः प्रसज्येत अस्तु तर्हि प्रकृत्यर्थविशेषणं सोपसर्गादिति चेदद्विदोषः सोपसर्गादिति चेददितो दोषो भवति समना
यतेनेति अत्यल्पमिदमुच्यते अतिदोषो भवतीति अतुल्यपद्विर्वचनेष्वि निवक्तव्यं अतिउदाहृते त्वपि समनाद्य द्विर्वचने अभिमिम
नापि प्राप्नोति नैष दोषः अवयवस्य ग्रामयतेः सोपसर्गादुत्पत्तिर्वक्तव्या असंग्रामयत शूर इत्येवमर्थं तन्नियमार्थं भविष्यति संग्रा
मयतेरेव सोपसर्गान्नान्यस्मात्सोपसर्गादिति यदि नियमः क्रियते स्वरो न सिद्ध्यति एवं तर्हि भूपादिषूपसर्गस्य यत्संगवद्भावं वक्ष्यामि
परियत्संगवद्भावमुच्यते अतुल्यप्द्विर्वचनानि न सिद्ध्यन्ति स्वरविधाविति वक्ष्यामि एवं च कृत्वा स प्रत्ययार्थविशेषणमिति न च योक्ते
भूपादिषूपसर्गः प्रत्ययार्थविशेषणमिति चेत्स्वरे दोष इति स्वरे यत्संगवद्भावेन परिहृतं अथेदानीं प्रत्ययार्थविषयो सत्रि दोषः कङो
कृत्वात्रस्यार्थस्य <u>आङः प्रयोगो न भाति अस्त्यत्र विशेषः एकेनात्र विशिष्टे</u> उपसर्गस्य प्रयोगो न प्राप्नोति किं कारणं उक्तार्थानामप्रयो
ग इति तद्यथा अपि काकः श्येनायते इत्यत्र क्वङोक्तत्वादाचारार्थस्य आङः प्रयोगो न भवति अस्त्यत्र विशेषः एकेनात्र विशिष्टे प्रत्यया
र्थे प्रत्यय उत्पद्यते इह पुनरनेकेन तत्र समनायत इत्युक्ते संदेहः स्यात् अभिभवतो सम्भवतो दुर्भवतो उद्भवतादिति तत्रासंदेहार्थ उपसर्गः प्र
सह प्रानर्थक एवाह्नात्र एवयवेन संग्रामशब्दे भृशुपगम्यमाने परस्य वर्णविकल्पो न स्यात् तत्र ग्रामयुद्ध इत्येव वक्तव्यं संशब्दस्त्र द्योतकः प्रयो
गदर्शनाल्लभ्यते यथा इक् स्मरणे इङ् अध्ययने इत्यनयोः अधिः नियमार्थस्तु संग्रामेति पाठः नियमार्थत्वे च मन्युयोन्यन्नावुपसर्गः पृथक् क्रि
यते अनेनायातो नेषामनन्तर्भावात् यथेष्टमङादिसिद्धिः प्रत्ययार्थविशेषणपक्षे तु विरोधादभेन तन्नद्भावविषयत्वनाश्रीयते असंग्रामय

छ्रोध्रुसनेष्ठान्यर्थमनेवेति ॥

प्रयुज्यते यत्र तर्ह्येकेनः सुखप्यते
यत्राप्यनेकेन कथं पृच्छाडदसनेष
नेति संग्रामयतिरन्तादात्रेसोपमः ॥

लोहितादि भृशादिभ्य इति कण्ड्वादिषु यङन्ताद् प्रत्ययः उरूपेति स्वर्णां हलमिति तृतीयास्थाने यादेशः पित्र्यमिति पितृ गगनमिति पितृर्यत्वेनित्
प्रत्ययः यदिद्‌ इति यदिदी ङ्रावप एव निवर्तते न तु दीर्घ विधावपि नदास्य स्ववस्य शाङ्गाभ्यां पूर्ववद्यादेशो कृते दीर्घाभावादस्तूयावस्तूयेति न

३ भा॰ कै॰ लोहितादि किमर्थः ककारः गुणवृद्धिप्रतिषेधार्थः किन्निवेति गुणवृद्धिप्रतिषेधो यथा स्यात् नैतदस्ति प्रयोजनं सार्वधातुका
२१ धधातुकयोरंगस्य गुणउच्यते धातोश्च विहितः प्रत्ययः शेषश्चार्धधातुकसंज्ञां लभेते न चायं धातोर्विधीयते लोहितादीनि प्रा
२१ तिप्रातिपदिकानि सामान्यग्रहणार्थस्तर्हि क्वसामान्यग्रहणार्थे नार्थः नः क्व इति नायं नान्ताद्विधीयते इह तर्हि यस्य हलः
क्यस्य विभाषेति नायं हलन्ताद्विधीयते इह तर्हि आपस्य च तद्धिते नामि काङ्‌क्षोश्चेति नायमापन्ताद्विधीयते इह तर्हि क्याच्छ
दसीति याच्छन्दसीत्येव तद्वक्तव्यं चुरण्युः तरण्युर्भुरण्युरित्येवमर्थं इदं तर्हि प्रयोजनं यत्तदकृत्सार्वधातुकारइति दीर्घत्वं न तत्र क्ङित्यग्रह ठि
णमनुवर्तते तदिहापि यथा स्यात् लोहितायते किं पुनः कारणं तत्र क्ङित्यग्रहणमनुवर्तते इह माभूत् उरूपा पूरुस्युयेति
यदि तत्र क्ङित्यग्रहणमनुवर्तते पित्र्यमिति पितुः रीङ्भावे क्ङित्यग्रहणं निवर्तिष्यते यदि निवर्तते कथमस्तूयावस्तूयाच यजा
मह इति अस्तूयतेरस्तूयावस्तूयतेर्वस्तूया अथवा च्छान्दसमेतत् दृष्टानुविधिः छन्दसि भवति यदि च्छान्दसत्वं हेतुः नार्थः क्ङि
त्यग्रहणेनानुवर्तमानेन कस्मान्न भवति उरूपा पूरुस्युयेति च्छान्दसत्वात् अथवा अस्त्वत्र दीर्घत्वं छान्दसं ह्रस्वत्वं भविष्यति तद्यथा
उपगायन्तु मां पत्नयो गर्भिणयो युवतयइति॥

सिध्यति अस्तूयतेः कण्ड्वादिषु गतस्यास्तूया वस्तूयतेरिच्छाकार्जनस्य वस्तूयेत्युत्तरं अथवेति वर्णव्यत्ययेन दीर्घः क्रियत इत्यर्थः यदीति अनेनक २१

इदानीं षकारप्रत्याख्यानाय विचारः क्रियते अथ किमर्थम् इति याप्येति याशादिभ्यो य इति सम्भवेय प्रत्ययः वायादिति सूत्रे विध्यर्थमन्य
ते अपि कृते एकादेशस्थानवद्भावात् प्रत्ययान्तमेतत् नैतदस्तीति सामान्यविहितानामात्मनेपदपरस्मैपदानां नियमार्थं प्रकरण
मित्यदोषः लोहितादिडाज्भ्यः क्यष् इति आदिशब्दः प्रत्याख्यानमेतत् अपठितसंग्रहार्थो व्यादिशब्दो न भवति नस्य वार्त्तिककारेण दृष्ट
अथ किमर्थः षकारः विशेषणार्थः क्व विशेषणार्थेनार्थः वा क्यष इति वायादिति यदुच्यमनेपाक्षपा अत्रापि प्रसज्येत नैत
दस्ति प्रयोजनं परस्मैपदं दिमित्युच्यते न चात्र परस्मैपदं पश्यामः सामान्यग्रहणाविघातार्थस्तर्हि भविष्यति क्व सामान्य
ग्रहणविघातार्थेनार्थः क्वाछंदसी याछंदसीत्येवमन्तद्वक्तव्यं न रणभ्ररण्युरित्येवमर्थं लोहितडाज्भ्यः क्यष्वचनं लोहि
तायति लोहितायते पटपटायति पटपटायते अथान्यानि लोहितादीनि भृशादिष्वित्तराणि भृशादिष्वितराणि पठितव्यानि किं
प्रयोजनं ङितः इति नित्यमात्मनेपदं यथा स्यात् कष्टाय क्रमणे कष्टायते किं निपात्यते कष्टशब्दाच्चतुर्थीसमर्थात् क्रमणे
ऽनार्जवे क्यङ् निपात्यते कष्टाय कर्मणे क्रामति कष्टायते अन्यत्वमिदमत्यनेकष्टायेति सत्रकक्षकष्टकृच्छ्रगहनेभ्यः क
ण्वचिकीर्षायाम् सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यं सत्रसत्रायते कक्षकक्षायते कष्टकष्टा
यते कृच्छ्रकृच्छ्रायते गहनं गहनायते अपर आह सत्रादिभ्यश्चतुर्थीतेभ्यः क्रमणोऽनार्जवे क्यङ् वक्तव्यः एतान्येवो
दाहरणानि सत्रात्रादिभ्य इति किमर्थं कुटिलाय अनुवाकाय क्रामति चतुर्थीतेभ्य इति किमर्थं अन्तः कष्टे क्रामति तत्र
हि वक्तव्यं नेदं प्रत्ययोत निपातनं नादर्थ्येपवाचतुर्थी ॥ ॥ ॥ ॥

तत्त्वात् कष्टाय कष्टायेति किं निपात्यत इति विपोऽनार्जवमेव क्रमणमिति विशेषो न लभ्यते इति क्रमणविशेषलाभाय निपा
तनाश्रयणं सत्रेति सत्रादयो हृद्यन्त्रविषयपापर्यायाः कथं पापमुच्यते कुटिलायेति दुरध्येयत्वादनुवाकस्यानार्जवमस्तीति भावः

कष्टायपदिति कष्टतत्त्वार्थप्रतिपादनाय यत्प्रातिपदिकं प्रयुज्यते तस्मात्क्रमणेऽर्थे क्यङ् भवतीत्यर्थः क्रमणविशेषस्यानार्जवमभिधा
नशक्तिस्वाभाव्याल्लभ्यते व्यवस्थितविभाषाविज्ञानाच्च पापादिभ्यो नातिप्रसंगाभावः कर्मण उद्गीर्णस्येति मुखप्रदेशादाकृष्टस्येत्यर्थः
१ अवगीर्णस्येति अपानप्रदेशान्निःसृतस्येत्यर्थः हनुचलन इति हनुचलनसहचरितं चर्वितस्य मुखप्रदेशादाकृष्य यच्चर्वणं तत्र यथासा
भा॰कै॰ कष्टायपत् प्रातिपदिकं कस्मार्थे यत्प्रातिपदिकमिति कर्मणो रोमन्थ इत्युच्यते कायरोमन्थो नाम उद्गीर्णस्य वावगीर्णस्य वा म
२२ थ्या रोमन्थः यद्येवं हनुचलन इति वक्तव्यं इह मा भूत् कीटो रोमन्थं वर्तयतीति तत्तर्हि वक्तव्यं न वक्तव्यं कस्मान्न भवति कीटो रो
22 मन्थं वर्तयतीति अनभिधानात् तपसः परस्मैपदं च तपसः परस्मैपदं चेति वक्तव्यं तपश्चरति तपस्यति कथं तपस्यते लोकजि
गीषुरग्निः छान्दसत्वात् भविष्यति बाष्पोष्मभ्याम् फेनाच्चेति वक्तव्यं फेनायते शब्दवैर अटा अट्टा शीका कोटा पोटा सोटा प्रुष्वा
प्लुष्वाग्रहणं कर्तव्यं अटा अटायते अट्टा अट्टायते शीका शीकायते कोटा कोटायते पोटा पोटायते सोटा सोटायते प्रुष्वा
प्रुष्वायते प्लुष्वा प्लुष्वायते सुदिनदुर्दिनाभ्यां च सुदिनदुर्दिनाभ्यां चेति वक्तव्यं सुदिनायते दुर्दिनायते नीहाराच्च नीहारा
च्चेति वक्तव्यं नीहारायते सुखादिभ्यः कर्तृवेदनायामिति किमर्थं इह मा भूत् सुखं वेदयति प्रसाधको देवदत्तस्य कर्तृवेदनायामि
त्युच्यमानेऽपि अत्र प्राप्नोति किं कारणं कर्ता हि नीयकर्ता हि षष्ठी वेदनायामिति च अनोभावे सपक्षे वात्मनो वेदयते अथापि
परस्य कर्तृवेदने चासौ भवति न कर्तृग्रहणेन वेदनाभिसंबध्यते किं तर्हि सुखादानाभिसंबध्यते कर्तृयानि सुखादीनीति ॥ ॥

दित्यर्थः कीट इति अपानप्रदेशान्निःसृतमन्नानीत्यर्थः अनभिधानादिति फेमथायत इति क्यङ् तेन लौकिके प्रयोगे चर्वितचर्वणं टि
सैवाभिधानं तत्त्वर्थान्तरस्येत्यर्थः सुखादिभ्यः किं तर्हीति वेदनायाः कर्तारमेतेनेणाभावात्कर्तृग्रहणसामर्थ्यात्सुखादीनि विशेष्यं टि
ते कर्तृग्रहणं च सुपां सुलुगिति षष्ठीलुकानिर्दिष्टं तेन तस्य वेदयितायदात्मसंबन्धीनि सुखादीनि वेदयते तदा प्रत्ययो नान्यदीयस्य टि २२
ते

नमोवरिव प्रकृत्यन्तरत्वादिति नमस्यतिधातुं व्युत्पादयितुं निपातनमःशब्दस्य शब्दान्तरावयवकल्पना क्रियते परमार्थतस्तु अविद्य
मानावयवार्थो नमस्यशब्दः पूजावाचा प्रकृत्यन्तरमित्यर्थः ननु चेति स एवायमिति प्रत्यभिज्ञानान्निपात एवायमिति भावः अर्थवत इति
नमस्यसमुदायस्यैवार्थवत्वादिति भावः अर्थेवेति अर्थवताभ्युपगमेन नमस्कारेण पूजयतीत्यर्थांगीकारेण परिहारान्तरं वक्तव्या

नमोवरि नमसः क्वचिद्द्वितीयानुपपत्तिः नमसः क्वचिद्द्वितीया नोपपद्यते नमस्यति देवानिति किं कारणं नमःशब्देन योगे च
तुर्थी विधीयते सा प्राप्नोति प्रकृत्यन्तरत्वात्सिद्धं नमःशब्देन योगे चतुर्थी विधीयते नमस्यतिशब्दश्चायं ननु च नमस्यतिशब्दे नमः
शब्दोऽस्ति तेन योगे न प्राप्नोति नैष दोषः अर्थवतो नमःशब्दस्य ग्रहणं न च नमस्यतिशब्दे नमःशब्दोऽर्थवान् अथ वोपपदविभ
क्तेः कारकविभक्तिर्बलीयसीति द्वितीया विभक्तिर्भविष्यति क्यजादिषु प्रत्ययार्थनिर्देशः कर्तव्यः नमसः पूजायां वरिवसः प
रिवसपर्यायां चित्रङ आश्चर्ये भाण्डात्समाचयने चीवरादर्जने परिधाने च पुच्छादुदसने व्यसने पर्यसने चेति किं प्रयोज
नं क्रियावचनता यथा स्यात् नैतदस्ति प्रयोजनं आचार्यप्रवृत्तिर्ज्ञापयति क्रियावचनाः क्यजादय इति यदयं सनाद्यन्ता धात
व इति धातुसंज्ञां शास्ति कथं कृत्वा ज्ञापकं धातुसंज्ञावचन एतत्प्रयोजनं धातोरिति तव्यदादीनामुत्पत्तिर्यथा स्यात् यदि
चात्र क्रियावचनता न स्यात् धातुसंज्ञावचनमनर्थकं स्यात् सत्यामपि धातुसंज्ञायां तव्यदादयो न स्युः किं कारणं साधने त-
व्यदादयो विधीयन्ते साधनं च क्रियायाः क्रियाभावात्साधनाभावः साधनाभावात्सत्यामपि धातुसंज्ञायां तव्यदादयो न स्युः पश्य
ति त्वाचार्यः क्रियावचनाः क्यजादय इति ततः सनाद्यन्ता धातव इति धातुसंज्ञां शास्ति ॥ ॥ ॥

स्तु नमोऽस्तु देवेभ्य इत्यादिरपवादः नमस्करोमि नारायणमित्यत्रापि कारकविव भवति क्यजादिष्विति करग्रहणस्य वेदनाग्रह
णेन व्यवधानादनधिकारे स्वार्थे प्रत्ययः प्रसंग इति वचनं वरिवस इति सपर्या सेवा परिचर्यायामिति पाठान्तरः ॥ ॥

परस्मायनइति शब्दांतरवाच्यायांक्रियायांयत्कर्मादिकारकं तत्रतव्यादीनांवृद्धंयप्रयोपत्यादोद्वितीयादीनामिवस्वार्थिकत्वाद्द्रव्यवाचि
१ त्वेपिकाजाद्यंतानामन्यत्रिःस्यादेवेत्यर्थः नपरस्मायनइति द्वितीयादीनांप्रातिपदिकीद्विधानात् तस्यचद्रव्यवचनत्वाद्वचनप्रामा
भा॰ के एयात्परस्मायनउत्पत्तिर्भवति तव्यादयस्तथात्वेतरेणुक्रियावाचिषुवसायनेसावकाशाः परस्मायनेनोत्पद्यंतइत्यर्थः अथवेति
२२ ननुचेदंप्रयोजनंस्यात् परस्मायनेतव्यदादीनांउत्पत्तिंवक्ष्यामीति नपरस्मायनउत्पन्नाभवितव्यं किंकारणं सायनइतिसंबं
23 धिशब्दोयं संबंधिशब्दाश्चपुनरेवमात्मकाःयदुतसंबंधिनमाक्षिपंति तद्यथा मातरिवर्तितव्यं पितरिशुश्रूषितव्यमिति ना
चोच्यतेस्वस्यांमातरिस्वस्मिन्पितरीति संबंधादेतत्गम्यते यंयस्यमातायश्चयस्यपितेति एवमिहापिसंबंधादेतत्गंत॰
व्यं यस्यधातोर्यत्सायनमिति अथवाधानवपवकजादयः नचेवह्यार्थाआदिश्यंते क्रियावच ताचगम्यते कःखल्वपि
पचादीनांक्रियावचनत्वेयत्नं करोतियेनैवखल्वपिहेतुनायचाहदयः क्रियावचनाःतेनैवकाजादयोपिएवंअर्थखल्वथा
वार्यः वित्रयति क्वचिदयानादिशंति क्वचिन्न एवमप्यर्थादेशनंकर्तव्यं कथमिमेअवुधावुध्येरन्निति अथवाशक्यमेवा॰
र्थादेशनमकर्तुंकथं करणइतिवर्तते करणंवकरोतेः करोतिश्चक्रियासामान्येवर्तते ॥ ॥

अभिधानशक्तिस्वाभाव्यादंतरणामर्थादेशनेविशिष्टक्रियावचनत्वस्यासिद्धत्वादित्यर्थः चित्रचनीति चित्रवैचित्र्यकरणइति॰
चौरादिकस्यरूपंअनेकंमार्गमाश्रयतीत्यर्थः क्रियासामान्येनचविशेषाणामाक्षेपात्कश्चित्प्रत्ययः क्वचिद्विशेषेभवतीत्य २२
र्थः नचवेदनाग्रहणेनकरणस्यविच्छेदः तयोर्विरोधाभावात् ॥ ॥ ॥

मुराडमिश्र कयोरिदंग्रहणमिति किमिकारांतयोः कृतात्वयोर्ग्रहणं आकारांतयोरेवेति प्रश्नः किंप्रयोजनमिति हलिकल्योरेवकस्मान्न क्रियत इत्यर्थः शब्दान्तरस्यैवे
ति यद्यपि वृद्धौ कृतायामपि लोपस्य प्रवृत्तिस्तथापि वाचनिकत्वस्यानित्यत्व अथवान्यस्य प्रवृत्तावप्यन्यस्यानित्यतोऽयं वृद्धौ लोपस्यानित्यत्वं अन्यस्य कृते लोप इति अ
न्तउपधाया इत्यनेनाकारस्येत्यर्थः ननु लोपस्य स्थानिवद्भावात्कथमकारस्य प्राप्नोति नैष दोषः प्राप्नोत्यसत्वात्स्थानिवद्भावे न पाते ... क्रियते एवं दोषस्यानिवद्भावविधाना न्नग्रहणे

मन्त्रभावमितिधार्यं हलिकल्योरनल निपातनं

मुंडमिश्र इत्योः हलिकल्योः इकारांतौ हलिः कलिः अस्ति हलशब्दः कलशब्दश्चाकारांतः कयोरिदं ग्रहणं पाणिका
रांतयोरत्वं निपात्यते किंप्रयोजनं हलिकल्योरत्वनिपातनं क्रियते सन्वद्भावो मा भूदिति अजहलत् अचकल
त नैतदस्ति प्रयोजनं इकारलोपे अग्लोपित्वान्नेति प्रतिषेधो भविष्यति वृद्धौ कृतायां लोपः तत्रासौ लोपं गे भव
ति इदमिह संप्रधार्यं वृद्धिः क्रियतां लोप इति किमत्र कर्तव्यं परत्वाद्वृद्धिः नित्यो लोपः कृतायामपि वृद्धौ प्राप्नोति
अकृतायामपि वृद्धिरपि नित्या कृतेपि लोपे प्राप्नोत्यकृतेपि अनित्यो लोपः अन्यस्य कृतायां वृद्धौ प्राप्नोत्यन्यस्या
कृतायां शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति वृद्धिरप्यनित्या अन्यस्य कृते लोपे प्राप्नोत्यन्यस्याकृते श
ब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति उभयोरनित्ययोः परत्वाद्वृद्धिः वृद्धौ कृतायां लोपः तत्रासौ लोपं गे भा
वति अत एतत्सिद्धिः क्रियतां लोप इति यद्यपि परत्वाद्वृद्धिः वृद्धावपि कृतायां अग्लोपित्वमुपपद्यते तस्मात्पृच्छ्यते ह

ऽर्वविधिभावात्स्यानिवद्भावएव न स्यात् यद्यपि भिन्नलक्षणाभिन्नस्वभावाच्च वृद्धिस्तथापि वृद्धिशब्दवाच्यत्वादभेदमाश्रित्य शब्दान्तरप्राप्त्या वृद्धेरनित्यत्वं कथितं तत्वतस्तु
लोपे कृते वृद्धेः प्राप्त्याऽनित्यत्वं कृत्वा न्यायसूत्रादनायत्तत्वाभिहितं सत्वं चेदं ग्लोपित्वं णिपाणिकाद्धात्वर्थे इति णिचि सिद्धे प्रपंचार्थमित्याहुः नचैतत्करोतीत्यादिना तद्धात्व
र्थे नियमः क्रियते राजानमतिक्रान्तवानत्यराजदित्यादावपि णिचो दर्शनात् मुंडं करोतीत्यमीमुण्डदित्यादौ सापेक्षेभ्योपि णिचो दर्शना र्थे वा ॥ छ ॥

= ननु हलेकारांतयोः ... [illegible]

भा० कै० ३ धातोरेकाचो इह समभिहारो नाम भूयस्त्वमनेकस्यैककालस्य भवति धातुवाच्या तु क्रियैकैव युगपदेकेन धातुनानेकस्याभिधानात् सा च निरन्तरभेदसाध्यैकस्मा-
२४ वृत्ता ह्यानुनाधृत्याप्यते अधिश्रयणादीनां चक्रमजन्मनामेकपदव्यवस्थानाभावाच्च क्रियासमभिहारो न संभवतीति मन्यमानः पृच्छति समभिहार इति कोऽयमिति इत्यत्र २२
२५ हु द्विपरीक्षार्थं शब्दव्युत्पत्तिमाह समभिपूर्वादिति यद्यप्येकेति मुख्यस्य समभिहारस्येहासंभवाद्गौणमाश्रयते बुद्धिगोचरानेकसकलावयवक्रियागतः पौनःपुन्येनानु

धातोरेकाचो समभिहार इति कोऽयं शब्दः समभिपूर्वो हरतेर्भावसाधनो घञ् समभिहरणं समभिहा-
र इति तद्यथा मालाभिहारः उत्पलाभिहार इति विषम उपन्यासः बहवस्ताः सुमनसः तत्र युक्तः समभिहार इ-
ह पुनरेका क्रिया यद्यप्येका सामान्यक्रिया अवयवक्रियास्तु बह्व्यः अधिश्रयणोदका-
सेचनतण्डुलावपनैधोपकर्षणक्रियास्ताः कश्चित्कार्त्स्न्येन करोति कश्चिदकार्त्स्न्येन तत्र
यः कार्त्स्न्येन करोति स उच्यते पापच्यत इति पुनः पुनर्वा पचति पापच्यते ॥ ४४४४ ॥

धीयमानप्रधानक्रियाविषयो वेत्यर्थः सामान्यक्रियेति साधारणी समूहरूपा क्रिया धातुवाच्येत्यर्थः तदुक्तं हरिणा गुणभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पिताभेदः
क्रियेति व्यपदिश्यते समूहस्तथाभूतः प्रतिभेदं समूहिषु समाप्यते ततो भेदे कालभेद एव संभवतीति अथ वात्राधिश्रयणादीनां तादर्थ्येन प्रवर्तनात् गुणत्वादव राम:
यवत्वं तत्साम्यसाधारणत्वमुच्यते तदुक्तं अनन्तरफलप्रस्याः कल्पितास्ताः क्रिया विदुः प्रधानभूतास्तादर्थ्यादन्यासां तु तदाख्यता कार्त्स्न्येनेति विजातीयावयवहिताल्पक २४

अथेति धातोरेव समभिहारविशिष्टक्रियावाचीयो न तु कस्तूपसर्गः न तु वाचक इति भावः प्राटनीति धातूपसर्गसमुदायस्य क्रियाविशेषा
वगतिहेतुत्वात्तेनायं द्विःप्रत्ययः स्यात् ततः सोपसर्गस्य द्विर्वचनं प्रसज्येत प्राटाट्यत इति चेदुच्यते सत्यं तत्रोक्तं वक्ष्यति हाराणि निदिशति यङि
अथ धातुग्रहणं किमर्थं इह माभूत् प्राटति भृशमिति अत उत्तरं पठति यङि धातुग्रहणमुक्तं किमुक्तं तत्र तावदुक्तं कर्मग्रहण
स्त्विधौ धातुग्रहणानर्थक्यं सोपसर्गकर्मेति चेन्न कर्मविशेषकत्वादुपसर्गस्यानुपसर्गकर्म सोपसर्गस्य हि कर्मत्वे धात्वधिकारे
पि सतोऽविधानमकर्मत्वादिति एवमिहापि क्रियासमभिहारग्रहणात् यङि धातुग्रहणानर्थक्यं सोपसर्गः क्रियासमभिहारे इ
ति चेन्न क्रियासमभिहारविशेषकत्वादुपसर्गस्यानुपसर्गः क्रियासमभिहारः सोपसर्गस्य क्रियासमभिहारत्वे धात्वधिकारेऽपि
यङोऽविधानमक्रियासमभिहारत्वादिति अथैकाज्हलादिग्रहणं किमर्थं इह माभूत् जागर्ति भृशमीक्षते रामिति एकाज्हला
दिग्रहणे चोक्तं किमुक्तं तत्र तावदुक्तं कर्मसमानकर्तृग्रहणानर्थक्यं चेच्छाभिधाने प्रत्ययविधानात् अकर्मणो ह्यसमानक
र्तृकाद्धा ह्यनभिधानादिति इहापि एकाज्हलादिग्रहणानर्थक्यं क्रियासमभिहारे यङ्वचनात् अनेकाचो हलादेर्ह्यनभिधानमि
ति न त्वावश्यमनभिधानमाश्रयितव्यं क्रियमाणेपि ह्येकाज्हलादिग्रहणे यत्रैकाचोऽस्योत्पद्यमाने न यङर्थस्याभिधानं न भवति
न भवति तत्रोत्पत्तिः तद्यथा भृशं शोभते भृशं रोचते यत्र चानेकाचोऽहलादेर्वोत्पद्यमानेन यङर्थस्याभिधानं भवति न तत्रोत्पत्तिः
तद्यथा अटाट्यते अरार्यते अशाश्यते सोसूच्यते सोसूत्र्यते ऊर्णोनेस्य ऊर्णोनेश्चोपसंख्यानं कर्तव्यं प्रोर्णोनूयते अल्पमिदमुच्य
ते ऊर्णोनेरिति सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनां ग्रहणं यङ्विधावनेकाजहलाद्यर्थं सोसूच्यते सोसूत्र्यते मोमूत्र्यते अटाट्यते अ
रार्यते अशाश्यते प्रोर्णोनूयते ऊर्णोतेर्नवक्तव्यः
धाविति धात्वधिकारेपीति प्रधायच्चनहन्यादौ ऊर्णोतेश्चेति यथान्यासे सिद्धाभा
वे द्विर्वचनं कार्यमित्यसिद्धयेऽवयत्सूर्णोतेर्णिवद्भावो वाच्यस्तेनैव यङोऽपि सिद्धिरित्याह ॥ ॥ ८

वाच्यइति तत्रयङिभावातिदेशः आमितोस्त्वभावातिदेशात्तयोर्न्नैतेरभावात् इडुपग्रहइट्प्रतिषेधः विभाषागुणाइतिपंचमी फलस्यचात्रहेतुत्वं य
३ भा॰ के॰ थाध्ययनेनवसनीति उदाहरणानि प्रोर्णोनूयते प्रोर्णोनाव प्रोर्णोनवानिति यङ्वच्चक्रियासमभिहारस्यद्योतितत्वान्नित्यवीप्सयोरितिक्रिया
२५ समभिहारेद्विर्भवतइतिवाद्विर्वचनेनभवति यदानुभूयार्थेपि योनः पुणपविवक्ष्यते तदापापच्यत इतिद्विर्वचनंभवत्येव सभवानिति

25

वाच्यकुर्णोन्तवन्नावोयङ् प्रसिद्धिः प्रयोजनं आमन्यप्रतिषेधार्थमेकाचश्चेडुपग्रहणात् क्रियासमभिहारेयङोविप्रतिषेधेनलो
द्विधानं क्रियासमभिहारेयङोलोड्भवतिविप्रतिषेधेन क्रियासमभिहारेयङ्भवतीत्यस्यावकाशः धात्वर्थएकाच्कलादिः क्रियासम
भिहारेवर्तते अधातुसंबंधः लोलूयते पोपूयते लोटोवकाशः धात्वर्थोनेकाच्कलादिः क्रियासमभिहारेवर्तत धातुसंबंधश्च स
भवान्जागृहि जागृहीत्येवायं जागर्ति सभवानीह खेदखेदेत्येवायमीहते धात्वर्थएकाच्कलादिः क्रियासमभिहारेवर्तते धातु
संबंधस्तस्मात् उभयंप्राप्नोति सभवान्लुनीहि लुनीहीत्येवायं लुनाति लोट्भवतिविप्रतिषेधेन ननर्हीदानीमिदंभवति
सभवान्लोलूयस्व लोलूयस्वेत्येवायंलोलूयतइतिभवतिच नवानानार्थत्वार्थत्वात्कर्तृकर्मणोर्हिलविधानेक्रियावि
शेषस्वार्थेयङ् नवार्थोविप्रतिषेधेन किंकारणं नानार्थत्वात् कानानार्थता कर्तृकर्मणोर्हि लोड्विधीयते क्रियाविशेषे
स्वार्थेयङ् नत्रानारंगत्वाद्यङाभावः ननर्हिइदानीमिदंभवति सभवानल्लुनीहीत्येवायंलुनानीति भवतिच विभाषायङ्

यदानङ् तदालोट्

सामान्यविशेषभावेनक्रियाभेदाश्रयोधातुसंबंधः सइति भृशार्थयोनः पुणपयोः प्रतिपिपादयिषितत्वादेकत
रस्मिन्यङ् प्रत्ययः अपरस्मिंस्तुलोट् लोटश्चकेवलस्यसमभिहारमभिव्यक्तुमसमर्थत्वादेतस्यद्विर्वचनंप्रवर्तते तत्रेति लाट्
द्विरंगः कर्तरीच्छपेन्नणाद्धातुसंबंधापेक्षणाच्च विभाषायङिति धातोः कर्मणइत्यतोवेत्यनुवर्तनात् ॥ २५

नित्यं कौ नहीति चङ्क्रम्यते इत्यस्माद्योऽर्थः प्रतीयते नासौ कुटिलं क्रामतीति वाक्येन शक्यः प्रत्याययितुमिति तदर्थाभिधानादेव वा
क्यं न भविष्यति अर्थान्तरे च कौटिल्यमात्रप्रतिपादने वाक्यं निवारयितुमशक्यमिति नित्यग्रहणमनर्थकमित्यर्थः क्रियासमभिहारे इ
ति नन्कौण्डिन्यन्यायेन कौटिल्यभावगर्हाभ्यां यङः क्रियासमभिहाराद्बाधितत्वोक्तत्वादिति भावः सत्यापपाश आचार्यमतभेद

नित्यकौटिल्ये गतौ लुपसदचरजप उत्तरयोर्योगयोर्विग्रहेण विशेषासंप्रत्ययात् नित्यग्रहणानर्थक्यं उत्तरयोर्योगयोर्विग्रहेण
विशेषस्यासंप्रत्ययान्नित्यग्रहणमनर्थकं नहि कुटिलं क्रामतीति चङ्क्रम्यते अथैतेभ्यः क्रियासमभिहारे यङ् भवितव्यम् क्रि इति गम्यते
यासमभिहारे च नैतेभ्यः क्रियासमभिहारे नैतेभ्यो यङ् भवितव्य भृशं जपतीति ब्राह्मणः भृशं समिधो दहतीत्येव सत्यापपाश
सत्यापेति किं निपात्यते सत्यस्य कृत्वा पुक् सत्यस्य कृत्वि आपुक् निपात्यते णिच् सत्यं करोति सत्यापयति अल्पमिदमुच्यते
णिज्विधावर्थवेदसत्यानामापुक्वक्तव्य अर्थापयति वेदापयति सत्यापयति यद्यापुक् क्रियते टिलोपः प्राप्नोति एवं त
र्हि पुक् करिष्यते एवमपि टिलोपः प्राप्नोति एवं तर्हि आक् करिष्यते एवमपि टिलोपः प्राप्नोति एवं तर्ह्यकं करिष्यते एवं तर्ह्याट्क
रिष्यते एवमप्यनाकारान्तत्वात् पुक् प्राप्नोति एवमप्यनेगन्तत्वात् वृद्धिः प्राप्नोति एवं तर्ह्यापुक् करिष्यते अथवा पुनरस्त्वापुगेव
ननु चोक्तं टिलोपः प्राप्नोतीति आपुग्वचनान्न भविष्यति अथवा पुनरस्तु पुगेव ननु चोक्तमेवमपि टिलोपः प्राप्नोतीति
पुग्वचनसामर्थ्यान्न भविष्यति अथवा पुनरस्त्वागेव ननु चोक्तमेवमपि टिलोपः प्राप्नोतीति आग्वचनान्न भविष्यति ॥

प्रदर्शनार्थोनेकपदतोन्यासः टिलोप इति णाविष्ठवदित्यतिदेशादिति भावः आक्करिष्यत इति न त्वपरत्वपेक्षत्वे चोत्थिणीति वृद्धेरुक्
तायां युगागम इति भावः अनाकारान्तत्वादिति यद्यत्र वृद्धिः स्यात् विधानमनर्थकं स्यात् अगागममन्तरेणापि तस्याः प्रसंगात् ततस्त
तद्बाधनार्थं वा गागमः स्यादिति भावः आपुगिति तस्य वर्णान्तभक्तत्वादकारस्य पूर्वस्य टिलोपे सति सत्यापयतीत्यादि सिद्ध्यतीति भावः ॥

३
भा॰ के
२९
26

हेतुमति च कृत्रिमस्य पारिभाषिकस्य प्रयोजकस्य हेतोर्ग्रहणं तदीयो व्यापारः प्रेषणाध्येषणात्मसमर्थाचरणलक्षणो हेतुमानिह गृह्यते
न तु सकलकारकसाध्यपाद्यपेक्षः प्रयोजकस्य हेतुव्यपदेशो न तु तदर्थावान्तरस्वसाध्यप्रेषणाद्यपेक्षः यथा काष्ठस्य पाकाद्यपेक्षं कार
णत्वं न तु ज्वलनाद्यपेक्षं तदपेक्षया तु कर्तृत्वमेव न तु स्वपाकादेरेव हेतुमद्व्यपदेशो युक्तो न तु प्रेषणादेः नैष दोषः णिच्प्रकृत्यर्थान्तु नैव
तस्यार्थस्य प्रकाशितत्वात् प्रयोजनाभावान्नैव वार्थे णिचोनुत्पादात् प्रयोज्योपि हेतुमच्छब्देन गृह्यते तस्य द्रव्यत्वात् णावस्य स्वभावतः
कारणाधिकाराद्धा क्रियावाचित्वात् स्यान्यविशेष्यात्पाकां -र्थोयः प्रेषणादिलक्षणो लक्ष्यपाकाद्यपेक्षो हेतुव्यपदे हेतुत्वोपलक्षित
हेतुमति च कथमिदं विज्ञायते हेतुमत्यभिधेये णिज्भवतीति आहोस्विद्धेतुमति यो धातुर्वर्तते इति युक्तं पुनरिदं विचारयितुं न
त्वेनेनासंदिग्धेन प्रत्ययार्थविशेषणेन भवितव्यं यावता हेतुमति चेत्युच्यते यदि हि प्रकृत्यर्थविशेषणं स्याद्धेतुमत इत्येवं ब्रूया
त् नैतदस्ति भवंति हि विषयसप्तम्योपि तद्यथा प्रमाणेयत्प्रातिपदिकं वर्तते स्त्रियां यत् प्रातिपदिकमिति एवमिहापि हेतुम
त्यभिधेये णिज्भवतीति आहोस्विद्धेतुमति यो धातुर्वर्तते इति जायते विचारणा अत उत्तरं पठति हेतुमतीति कारकोपादानं प्रत्य
यार्थपरिग्रहार्थं यथा तत्कारणेन तः हेतुमतीति कारकमुपादीयते किं प्रयोजनं प्रत्ययार्थपरिग्रहार्थं एवं सति प्रत्ययार्थः स
प्रयोजकसाध्यो व्यापारः स एव गृह्यते कथमिति यदा पचतीत्युक्ते प्रयोज्यसाध्य एव व्यापारो गम्यते न प्रयोजकसाध्योपि तदा प्रत्ययार्थ
स्य करणाधिकारोपस्थापितस्य कारणस्य विशेषणं हेतुमतीति संपद्यते यदा त्वनेकार्थत्वाद्धातूनां तादर्थ्यादपि श्रयणादिवत् प्रयोज
कव्यापारोपि पचादिवाच्यो भवति यथा पचंभिर्हलैः कृषतीति तदा प्रकृतिविशेषणपक्षो भवति तदा तु णिच्प्रत्ययो द्योतकः संपद्यत इ
ति पक्षद्वयस्य संभवाद्दोषदर्शनाच्च प्रश्नः हेतुमत इति हेतुमदर्थाभिधायिन इत्यर्थः कारकोपादानमिति कारकशब्देन प्रत्ययार्थ उच्यते स
हि प्रत्ययं निष्पादयति प्रत्ययार्थ इति प्रत्ययस्यार्थः प्रयोजनं स स्वरूपपरिगृहीतः परिपूर्णो भवति वाचकत्वात्प्रत्ययस्य प्रकृतिविशेषणत्वे
तु प्रत्ययस्यानुवादकत्वाद्द्योतकत्वात्प्रयोजनमपरिपूर्णं स्यादित्यर्थः अथवार्थोभिधेयमुच्यते स चान्वयव्यतिरेकाश्रयव्यवस्थत्वात्से २९

यथानन्तकरणमिति यथाविकरणार्थाः कर्त्रादय इति यत्र स्तदानन्तकरणशब्देन कर्ताभिधीयते तदा साधर्म्येण दृष्टान्तो यदा तु सार्वधातु
कार्थाः कर्त्रादय इति पक्षस्तदा वैधर्म्येण दृष्टान्त इति व्याख्याने यथानन्तकरणं प्रकृत्यर्थोऽनन्यथाहेतुमद्व्यापारादित्यर्थः यस्तु साधर्म्येण
दृष्टान्ते सार्वधातुकार्थत्वं च कर्त्रादीनां मन्यमानस्त्वाह यदि तर्हीति अस्त्विति विनापि णिचा यं च भिहृत्लेः कृषतीति प्रयोजकव्यापाराव
गमात् प्रकृत्यर्थत्वं हेतुमत उपपद्यते पचतीत्यादौ द्योतकोऽणिन्नास्तीति तदप्रतिपत्तिरिति भावः उक्तः करोतीति प्रकृतिविशेषणमेव स्याप
या प्रकृत्याभिहिते प्रयोजकव्यापारे णिज् भवति एवमुक्तादिप्रेषितादिप्राह्याभिहितेऽपि प्राप्नोति हेतुमद्विषयत्वात्करोत्यर्थस्य प्रत्ययार्थ
यथानन्तकरणेन तद्वदिति तत्करणमुपादीयते यदि तर्हि तद्वत्प्रकृत्यर्थविशेषणमिदं भवति प्रकृत्यर्थविशेषणं हि तत्र विज्ञायते तत्
करणक्रियायां तद्वदिति अस्तु प्रकृत्यर्थविशेषणं को दोषः इह हि तेनोक्तः करोति प्रेरितः करोतीति णिच् प्राप्नोति प्रत्ययार्थविशेषणे
सति पुनर्न दोषो भवति स्वपाहेतोरुक्तत्वान्न भविष्यति प्रकृत्यर्थविशेषणेऽपि सति न दोषः यत्र तान्तरेण शब्दमर्थस्य गतिः तत्र शब्दः प्रयु
ज्यते यत्र ह्यन्तरेणापि शब्दमर्थस्य गतिर्भवति न तत्र शब्दः प्रयुज्यते इह तर्हि पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति उभयोः कर्त्रोर्लेनाभि
धाने प्राप्नोति प्रत्ययार्थविशेषणे सति पुनर्न दोषः प्रधानकर्तरि लादयो भवन्तीति प्रधानकर्ता लेनाभिधीयते यस्त्वत्राप्रधानं सिद्धा
स्य विशेषणपक्षे तत्कार्थत्वात्तस्मिन्भावः यत्रेति यस्यार्थस्य द्योतनाय णिज्विधीयते स यदा शब्दान्तरावगतो भवति तदा प्रयोजनाभावा
त्तस्मिन्न भवतीत्यर्थः उभयोरिति धातुवाच्यस्य व्यापारस्य कर्तरि लकारेणोक्तत्वं यदा पचिनाद्वयोरपि प्रयोज्यप्रयोजकयोः
व्यापारोऽभिधीयते णिच्प्रत्ययः केवलं स्वार्थिकत्वात् प्रयोजकव्यापारस्य द्योतकस्तदा धातुवाच्यव्यापारसामान्यात्कर्त्रोरपि सामान्यादभि
ति द्वयोरप्यभिधानं स्यात् ततः पाचयतो देवदत्तयज्ञदत्ताविति प्रसज्येतेत्यर्थः प्रधानकर्त्रेति प्रकृत्यर्थोपसर्जनत्वात् एवार्थस्य प्रा
धान्यात्तस्य कर्तापि प्रधानमिति भावः ॥

३
भा· कै·
२७
27

गमितइति प्रयोजकव्यापारस्य गमिवाच्यत्वात्तस्य कर्तरि प्रयोजकोक्तः प्राप्नोतीत्यर्थः प्रयोज्यस्य तु कर्मत्वात्तत्रैव क्त इष्यते तदुक्तं अप्रधाने दुहा दीनां ण्यन्ते कर्तुश्च कर्मणः इति व्यतिभेदयंतेइति प्रयोजकव्यापारस्य व्यतीहारो न तु प्रयोज्यव्यापारस्येति द्रष्टव्यं भवति हि ज्ञाति एतदर्थस्य प्रा धान्यात्तद्व्यापारो गुणोप्सिततमत्वात् प्रयोज्यस्येत्यर्थः प्रकृत्यर्थविशेषणत्वेन द्वयोरपि प्रयोज्यप्रयोजकव्यापारयोरेकधातुवाच्यत्वा

इह च गमितो ग्रामं देवदत्तो यज्ञदत्तेनेति अव्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थानां क्तः कर्तरीति कर्तरि क्तः प्राप्नोति इह च व्यतिभे दयंते व्यतिछेदयंत इति अव्यतिरिक्तो हिंसार्थ इति कृत्वा न गतिहिंसार्थेभ्य इति प्रतिषेधः प्राप्नोति अस्तु न हि प्रत्ययार्थविशेषणं यदि प्रत्ययार्थविशेषणं पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्तरि कर्मसंज्ञा प्राप्नोति भवति हि तस्य तस्मिन्नीप्सा इ हे च ग्रामं गमयति ग्रामं गमयतीति व्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थकर्मणीति द्वितीया चतुर्थ्यौ न प्राप्नुतः इह चैधो दकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थ इति कृत्वा कृञः प्रतियत्न इति षष्ठी न प्राप्नोति इह च भेदिका देवदत्तस्य यज्ञदत्त स्य काष्ठानामिति प्रयोज्ये कर्तरि षष्ठी न प्राप्नोति इह चाभिषावयति पर्यभिषावयतीति व्यतिरिक्तः सुनोत्यर्थ इति कृत्वा उप सर्गात्सुनोतिसुवतीत्यादिना षत्वं न प्राप्नोति नैष दोषः यावता तावदुच्यते पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये क र्तरि कर्मसंज्ञा प्राप्नोतीति गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणीत्येतन्नियमार्थं भविष्यति ॥ १

ज्ञातु वाच्यव्यापारापेक्षया द्वयोरपि कर्तृत्वात् ल्येनाभिधाने प्राप्नोतीति दोष उक्तः ग्रामं गमयतीति एतदर्थस्यैव ग्रामः प्रयोज्यास्तु क र्मेति भावः षष्ठी न प्राप्नोतीति एतदर्थस्य कर्मत्वादिति भावः तदटं तु करोतिधात्वार्थस्मिन् त्वत्र भावपितद्रूपसन्निधानात्तिष्ठत्येव ते तेन तत्राच चतुर्दत् प्रयोज्ये कर्तरीति तस्य प्राधान्यादिति भावः अभिषावयतीति एतदर्थस्योपसर्गो विशेषक इति भावः ॥ २७

एतेषामेवेति एवमर्थस्य प्राधान्यात्तेनेप्सिततमस्य प्रयोज्यस्य सिद्धा कर्मसंज्ञा न च स्वव्यापारापेक्षया स्वातन्त्र्यात् यः स्वतन्त्रः कर्ता इति संज्ञा प्रा
प्नोतीति युक्तं वक्तुं प्रयोज्यव्यापारस्याप्राधान्यात् प्रधानव्यापारसन्निधौ च प्रधाननिमित्तस्य कार्यस्य युक्तत्वात् नियमेन तु प्रधानप्रयुक्तं का
र्यं स्यात् तेनो गुणनिमित्तकार्यसंज्ञा वा स्यात् कर्तृत्वं भवत्येव ननूक्तं हृ इति गुणक्रियायां स्वातन्त्र्यात् प्रयोगे कर्मणि तेनेतः नियमात् कर्मसंज्ञा याः ग॰
एतेषामेवाणौ कर्ता यः कर्ता स णौ कर्मसंज्ञो भवति नान्येषामिति यदप्युच्यते इह च ग्रामं गमयति ग्रामाय गमयतीति व्यति
रिक्तो गत्यर्थ इति कृत्वा गत्यर्थकर्मणीति द्वितीया चतुर्थ्यौ न प्राप्नुत इति नासावेवं प्रेष्यते गच्छ ग्राममिति किं तर्हि साधनविशिष्टे कथं॰
क्रियामसौ प्रेष्यते ग्रामं गच्छ ग्रामाय गच्छेति यदप्युच्यते इह तु चरणोदकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थ इति कृत्वा हृ
नः प्रतियत्न इति षष्ठी न प्राप्नोतीति नासावेवं प्रेष्यते उपस्कुरु पयोदकस्येति कथं तर्हि साधनविशिष्टां क्रियामसौ प्रेष्यते
त्र॰ पयोदकस्योपस्कुरुष्वेति यदप्युच्यते भेदिकादेवदत्तस्य यज्ञदत्तस्य काष्ठानामिति प्रयोज्ये कर्तरि षष्ठी न प्राप्नोति उक्तं न च कृत्य
हणस्य प्रयोजनं कर्तृभूतपूर्वमात्रेऽपि षष्ठी यथा स्यादिति यदप्युच्यते इह चाभिषावयति परिषावयतीति व्यतिरिक्तः सुनोत्य
र्थ इति कृत्वा उपसर्गात्सुनोतीत्यादिना षत्वं न प्राप्नोतीति नासावेवं प्रेष्यते सुनु अभीति किं तर्हि उपसर्गविशिष्टां क्रियामसौ
प्रेष्यते अभिषुणु इति युक्तं किं पुनरिदं किं वार्यमित्येनन्वेतेनासंदिग्धेन प्रत्ययार्थविशेषणेन भवितव्यं यावता व्यर्थमर्थान्तरे

गम्यते पचति पाचयतीति च वाढं युक्तं इह पचेः कः प्रधानार्थः

स्वधर्मेणाभिधीयत इति नासाविति ग्रामः प्रकृत्यर्थस्य कर्म न तु एवमर्थस्येत्यर्थः साधनविशिष्टामिति ग्रामकर्मिकां गमनक्रियां प्र
धातोः कर्मणस्त्वयति कर्मणः सतः कर्तुरित्यर्थः कर्मणेति वोपादानादयमर्थो लभ्यते यस्य धातोर्यत् कर्म तस्य यया क्रियया तुल्यक्रियः क
र्त्ता तस्यैव धातोर्यदि भवति ततः कर्मवद्भवति आहरकं भमिति समर्थपरिभाषोपस्थानमनेनोपायेन भवत्येवेष्टसिद्धिरिति प्रदर्शनायो
पन्यासः कर्तारमिति कर्तृस्थां क्रियामित्यर्थः किं पुनरिति किमतिदेशेन स्वाश्रयं निवर्त्यते आहोस्वित्नेति प्रश्नः यद्यपि स्वाश्रयमपि य
यदप्युच्यते कर्मदृष्टश्चेत् समानधाताविति वक्तव्यमिति न वक्तव्यं धातोरिति निवर्तते धातोः कर्मणः कर्ता यं कर्मवद्भाव उच्यते
तत्र संबन्धादेतद् गन्तव्यं यस्य धातोर्यत् कर्म तस्यैवेत् कर्ता स्यादिति न ह्यन्यस्य धातोः कर्मण्यपरः भवतीति तत्र संबन्धादेतद् गम्य
ते यस्य धातोर्यत्कर्मेति इह माभूत् आहरकं भं करोति कटमिति यदप्युच्यते कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्म
वद्भवतीति वक्तव्यं कर्तृस्थभावकानां कर्तृस्थक्रियाणां वा कर्ता कर्मवन्माभूदिति न वक्तव्यं कर्मस्थया क्रियया यं कर्तारमनु
पमिमीते न च कर्तृस्थभावकानां कर्तृस्थक्रियाणां वा कर्ता कर्मवन्माभूदिति न वक्तव्यं कर्मस्थया क्रियया यं कर्तारमुपमि
मीते न च कर्तृस्थभावकानां कर्तृस्थक्रियाणां वा कर्मणि क्रियायाः प्रवृत्तिरस्ति किं पुनः कर्मकर्तरि कर्माश्रयमेव भवति आ
होस्वित् कर्त्राश्रयमपि किं वातः यदि कर्माश्रयमेव चङ् शप् कृद्विधयो न सिद्ध्यन्ति चङ् अचीकरत् कटः स्वयमेव चङ् शप्
नमते दण्डः स्वयमेव शप् कृद्विधिः भिदुरं काष्ठं स्वयमेव अथ कर्त्राश्रयमपि सिद्धमेतत् भवति किं न हीति आत्मनेपदशावादि
यासादित्यत्र निर्णयः कृतः तथापि दोषभावना यत्पुनर्विचार्यते अचीकरतेति अङ्क्षिणोः प्रतिषेधेपि स्वाश्रयो चङ् शपैन शप्तुनः भिदुरस्य
ति कर्तरि कृदन्तन प्राप्नोति लं तस्य कर्ता कर्मवदिति तता वस्यापि न सिति कृद्विधेरसिद्धिरुक्ता उभयमिति कर्त्तैव यः कर्ता तत्र परस्मैप
दमिति परस्मैपदाभावादात्मनेपदं भवति कर्तरि शबित्यत्र कर्तरीति योगविभागेन शबादीनां यकादीनां बाधनं भवति कार्यातिदेशो वा यमा ५८

स्वातंत्र्यस्येति पच्यते ओदनः स्वयमेवेति विक्लित्तिमात्रवाचीपचिस्तत्रौदनस्य कर्तृत्वमेवं लूयते केदारः इति द्विधाभवनवाचीलुनाति
स्तया च केदारस्य कर्तृत्वं क्रिया चेति विशरणक्रियेत्यर्थः किं च भोः इति कारणाभावे विशरणाख्यकार्याभावादवश्यं केनचिद्दात्रादि

किमर्थं पुनरिदमुच्यते कर्मकर्तरि कर्तृत्वं स्वातंत्र्यस्य विवक्षितत्वात् कर्मकर्तरि कर्तृत्वमस्ति कुतः स्वातंत्र्यस्य विवक्षि
तत्वात् स्वातंत्र्येणैवात्र कर्ता विवक्षितः किं पुनः सतः स्वातंत्र्यस्य विवक्षाहोस्विद्विवक्षामात्रं सत इत्याह कथं ज्ञा
यते इह हि भिद्यते कुसूलेनेति न चान्यः कर्ता दृश्यते क्रिया चोपलभ्यते किं च भोः बिग्रहवत्येव क्रियायाः कर्त्रा भवितव्यं
न पुनर्वातातपकाला अपि कर्तारः स्युः भवेत्सिद्धं यदि वातातपकालानां अन्यतमः कर्ता स्यात् यस्तु खलु
निवाते निरश्मिवर्षे अचिरकालकृतः स्वयमेव भिद्यते तस्य नान्यः कर्ता भवति अन्यदतः कुसूलात्
यद्यपि तावदत्रैतच्छक्यतेवक्तुं यत्रान्यः कर्ता नास्ति इह तु कथं स्यात् लूयते केदारः स्वयमे
वेति यत्रासौ देवदत्तो दात्रहस्तः समंततो विपरियन्दृश्यते अत्रापि यासौ सुक
रता नाम तस्या नान्यः कर्ता भवति अन्यदतः केदारात् ॥ ८

नाकारणेन भाव्यमिति भावः अन्यदत इति कुसूलस्यैव विशरणक्रियायां कारणत्वोपपन्नावदृश्यमानकारणान्तरकल्प
नाया अयुक्तत्वादिति भावः सुकरतेति द्विधाभवनलक्षणक्रियेत्यर्थः अन्यथा पर्वतमपि देवदत्तो लुनीयादिति भावः ॥

२
भा० कै०
५७
57

लूनस्य कर्त्रेति लूनवाच्यो यः कर्ता स लूनकार्य एव कर्मवद्भवतीत्यर्थः तेन कर्मणि विधीयमानाः कृत्यादयो तिदेशात्कर्मकर्त्तरि
न भवन्तीति भाव एवोत्पद्यन्ते ततस्तैः कर्त्तरनभिहितत्वात्कर्त्तरि विभक्तौ षष्ठी तृतीये भवतः भेत्तव्यं कुसूलस्य भेत्तव्यं कुसूलेनेति भि
त्तिप्रयोजनमेतत् किं तर्हीति तत्र लूनस्य कर्मवदतिदेशः लूनस्य कर्मवदतिदेशः कर्त्तव्यः लूनस्य कर्ता कर्मवद्भवती
ति वक्तव्यं अन्यथा हि कृत्यक्तखलर्थेषु प्रतिषेधः अक्रियमाणो हिल ग्रहणे कृत्यक्तखलर्थेषु प्रतिषेधो वक्तव्यः स्यात् कृ
त्यभेत्तव्यः कुसूलः इति कर्म स यदा स्वातन्त्र्येण विवक्षितस्तदास्य कर्मवद्भावः स्यात् तस्य प्रतिषेधो वक्तव्यः तस्मिन् प्रतिषि
द्धे अकर्मकाणां भावे कृत्या भवन्तीति भावे कृत्यो यथा स्यात् भेत्तव्यं कुसूलेनेति क्तभिन्नः कुसूल इति कर्म स यदा स्वातन्त्र्येण
विवक्षितो भवति तदास्य कर्मवद्भावः स्यात् तस्य प्रतिषेधो वक्तव्यः तस्मिन् प्रतिषिद्धे अकर्मकाणां भावे क्तो भवतीति भावे
क्तो यथा स्यात् भिन्नं कुसूलेनेति खलर्थे ईषद्भेदः कुसूल इति कर्म स यदा स्वातन्त्र्येण विवक्षितो भवति तदास्य क
र्मवद्भावः स्यात् तस्य प्रतिषेधो वक्तव्यः तस्मिन् प्रतिषिद्धेऽकर्मकाणां भावे खल् भवतीति भावे खल् यथा स्यात् ईषद्भे
दं कुसूलेनेति तत्र हि लहिलग्रहणं कर्त्तव्यं न कर्त्तव्यं क्रियते न्यास एव लिङ्याशिष्यङिति हिलकारको निर्देशः सि
सिद्धं तु प्राकृतकर्मत्वात् सिद्धमेतत् कथं प्राकृतकर्मत्वात् प्राकृतमेवैतत् कर्म यथा कटं करोति शकटं करोतीति कथं पु
यते कुसूलः इत्यत्र चाद्वितीयानभवति क्तग्रहणास्यात्र प्रयोजनं नेनहश्यते गवादुग्धं पयः इत्यत्र दृश्यते इत्याङ्ः तथा ह्यकर्मकत्वाद्
त्यर्थाकर्मकेति वचनात्कर्त्तरि भवितव्यमेव क्तेन भिन्नः कुसूलः स्वयमेवेति तथा चषितो नेत्र क्लिकर्मकर्तृकस्येति वक्तव्यमिति
सितो ग्रासः स्वयमेवेति क्तः कर्त्तरि उदाहरिष्यते सिद्धं त्विति प्राकृतं स्वाभाविकमेवैतत्कर्मत्वातिदेशिकमित्यर्थः ॥ ॥ ५७

आत्मसंयोग इति एकस्यैव वस्तुनो भेदेनात्मा कर्मत्वेन कर्तृत्वेन च विवक्षित इत्यर्थः तदुक्तं एकस्यैवावस्थाभिर्भेदे च परिकल्पिते क
र्मत्वं करणत्वं च कर्तृत्वं चोपजायत इति कर्म दृश्यत इति कर्मत्वेन दृश्यत इत्यर्थः विषम उपन्यास इति अयं भावः दृष्टान्ते आत्मभेदस्य शब्दे
न प्रतिपादितत्वाद्युक्तं कर्मत्वं इह तु लूयते केदारः पच्यते ओदन इत्यादौ यदा स्वयमिति शब्दो न प्रयुज्यते तदात्मभेदाविवक्षायां कर्मत्वा
भावात् कर्तृत्वमेव द्विधाभवनादौ केदारादीनामिति कर्मवदतिदेशः कर्तव्य एव नमते दण्ड इत्यादौ च प्राकृतकर्मत्वे यक्चिणोः प्रति
षेधे प्राप्ते च ते न स्यातां भिद्यते कुसूलेनेति च सकर्मकत्वाज्ज्ञानो मीवेलो न स्यात् कर्म दृश्यत इति आत्मानं इति द्वितीयान्तवाच्यं

आत्मसंयोगेऽकर्मकर्तुः कर्मदर्शनात् आत्मसंयोगेऽकर्मकर्तुः कर्म दृश्यते क्व हन्त्यात्मानमात्मना हन्यत इति विषम उपन्या
सः हन्त्यात्मानमिति कर्म दृश्यते कर्ता न दृश्यते आत्मना हन्यत इति च कर्ता दृश्यते न कर्म दृश्यते पदलोपश्च पदलोपः
अत्र द्रष्टव्यः हन्त्यात्मानमात्मा आत्मना हन्यत आत्मेति कः पुनरात्मानं हन्ति को वात्मना हन्यते द्वावात्मानौ शरीरात्मा अन्तरा
त्मा च शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति

कर्ता न दृश्यत इति हन्तीति कर्तरि लकारेणात्मनो वापि कर्तृविशेषानुपादानादिति भावः कर्ता दृश्यत इति न कर्म तत्रेणोक्तियाया अभावा
दात्मनेत्यनद्याच्य इति भावः कर्म न दृश्यत इति कर्तृव्यतिरेकेणान्यस्यात्र कर्मणो ऽनुपपादनादिति भावः पदलोपश्चेति गम्यमाना
र्थत्वादप्रयोगः पदस्येत्यर्थः यत्र लूयते केदारः स्वयमेवेति हन्त्रिकौरैः केदाह्रियते न त्र कर्तृन्तराभावप्रतिपादनेन केदारस्यैव कर्तृत्व
प्रतिपादनाय स्वयंशब्दः प्रयुज्यते नन्वेवं कर्मवद्भावस्योदाहरणं स्वयंशब्दस्यात्मनेति तृतीयान्तार्थे वर्तमानादात्मनः कर्तृत्वे केदा
रस्य प्राकृतकर्मत्वसद्भावात् द्वावात्मनाविति ण्णोरणाविन्यत्र व्याख्यातमिति नन्वेवावधार्यम् ॥ ॥

आश्लिष्यत इति क्रियाफलस्य संयोगस्य कर्मणि दर्शनात्कर्मस्थक्रियात्वमत्र द्रष्टव्यं तपेर्वेति तप इति योगविभागेन नियमः क्रियत इति
३ भावः ननु तप्यते तपस्तापस इत्यत्र कर्मस्थक्रियया तुल्यक्रियत्वे कर्तृत्वं नास्ति उपवासादेस्तपसः कर्तृत्वे तपेर्दुःखार्थत्वात्ताप
भा॰कै॰ सस्य कर्तृत्वे दुःखनार्थत्वात् नैष दोषः शरीरसंतापलक्षणायाः क्रियायास्तुल्यत्वादवस्थाद्वयेपि शरीरसंतापलक्षणमेवाजनना
५८
58

सकर्मकाणां प्रतिषेधोऽन्योन्यमाश्लिष्यत इति सकर्मकाणां प्रतिषेधो वक्तव्यः किं प्रयोजनं अन्योन्यमाश्लिष्यतः अन्योन्यं
संस्पृशतः अन्योन्यं गृह्णीत इति तपेर्वा सकर्मकस्य वचनं नियमार्थं तपेर्वा पुनः सकर्मकस्य वचनं नियमार्थं भविष्यति
तपेरेव सकर्मकस्य नान्यस्य सकर्मकस्येति तस्य तर्ह्यकर्मकस्यापि प्राप्नोति उत्तपति सुवर्णं सुवर्णकारः उत्तप्यमानं सुव
च॰ र्णं सुवर्णकारमुत्तपति तस्य च तपः कर्मकस्यैव तस्येति तपः कर्मकस्यैव कर्ता कर्मवद्भवति नान्यकर्मकस्य किमिदं तप इति
तपेरयमौणादिकः अस्कारो भावसाधनः कः प्रकृत्यर्थः कः प्रत्ययार्थः स एव संतापः कथं पुनः स एव नाम प्रकृत्यर्थः ^
स्यात्स एव च प्रत्ययार्थः सामान्यतपेरवयवतपिः कर्म भवति तद्यथा सपतान् योधानपुष्यत् गोपोषमश्वपोषं इति सा
मान्यपुषेरवयवपुषिः कर्म भवति एवमिहापि सामान्यतपेरवयवतपिः कर्म भवति दुहिपच्योर्बहुलं सकर्मकयोः दुहि
पच्योः सकर्मकयोः कर्ता कर्मवद्बहुलं भवतीति वक्तव्यं ॥

पसस्य यतो व्यापारः कः प्रत्ययार्थ इति तापसेन तपस्तप्यत इति कर्मणि लकारोत्पत्तौ प्रकृत्यर्थस्यैव क्रियारूपस्य प्रत्ययार्थित्वं दृष्टमने
क्रियाकर्मणोश्च साध्यसाधनभावाद्भेदेन भाव्यं इह तु भेदाभावात्प्रकृतिप्रत्ययार्थानुपपत्तिः अथवा तपः कर्मस्येति वचनात् प्र ५८
कृत्यर्थस्यैव कर्मत्वमाश्रितं न च विरुद्धमिति भावः अवयवतपिरिति विशेषतपिः ज्ञानलक्षणं तप इत्यर्थः ॥ ॥

दुग्धेगोरिति गोर्भवतिपयइत्यर्थः दुहेर्द्विकर्मकत्वात्कर्मस्याक्रियानुल्पाक्रियत्वेपिसकर्मकत्वादप्राप्तेवचने फलंपच्यतेइत्यत्रवृत्त
स्यकर्तृत्वविवक्षायामत्यंतमप्राप्तेवचने अन्येत्वाहुः यद्विरत्रविषयेद्विकर्मकोवृक्षस्यपाकमंतरेणफलपाकासंभवात् हेतोः
कथ्यते कर्मतस्यैवचयदाकर्तृत्वविवक्षानदायंकर्मवद्भावः एवंविधएवचविषयेकर्मवद्भावइष्यतेनपुनरोदनंपचतीत्यादौष्य
द्रोपपन्नइतिश्रद्धायुक्तेकर्तरीत्यर्थः चिणात्मनेपदार्थइति श्यनायगेववाध्यते नतुचिणोत्यर्थः श्यनितप्रकृतेरात्मदात्तत्वंभ
दुग्धेगोः पयः स्वयमेवतस्मादुडुंवरः सहलोपिहितंफलंपच्यते बहुलवचनंकिमर्थंपरस्मैपदार्थंयद्येवंनार्थो बहुलवचनेनन
हियरस्मैपदमिष्यते सृजियुज्योः श्यंस्तु सृजियुज्योः सकर्मकयोः कर्ताबहुलंकर्मवद्भवतीतिवक्तव्यं श्यंस्तुभवति सृ
जेः श्रद्धोपपन्नेकर्तरिकर्मवद्भावोवाच्यः चिणात्मनेपदार्थः सृज्यतेमालां असर्जिमालामिति युजेस्तुत्याप्येकर्तरियको
ऽभावाययुज्यतेब्रह्मचारीयोगं करणेनतल्पाक्रियः कर्ताबहुलंकर्मवद्भवतीतिवक्तव्यं परिवारयंतिकंटकैर्वृक्षं परिवार्
यतेकंटकावृक्षं स्रवत्यादीनांप्रतिषेधः स्रवत्यादीनांप्रतिषेधोवक्तव्यः स्रवतिकुंडिकाउदकं स्रवतिकुंडिकायाउदकं
स्रवंतिवलीकान्युदकं स्रवतिवलीकेभ्यउदकं सनर्हिप्रतिषेधोवक्तव्यः तल्पाक्रियइत्युच्यते क्रियांतरंचात्रगम्यते इहता
वत् स्रवतिकुंडिकाउदकमितिविसृजतीतिगम्यते स्रवतिकुंडिकायाउदकमितिष्क्रामतीतिगम्यते स्रवंतिवलीकान्यु
दकमिति विसृजंतीतिगम्य
वतिपयकिंतुल्लसावंधातुकान्तदात्तत्वेयकएवोदात्तत्वमितिएतन्यकोरत्रस्वरेविशेषः सृजतेमालामिति श्रद्धयामालांनिष्पादयती
त्यर्थः असर्जिमालामिति मालांनिष्पादितवानित्यर्थः यकोभावायेति अकारप्रश्लेषात् यकवाधनायेत्यर्थः युज्यतइति योगो
ब्रह्मचारिणंयुनक्तिसंवध्नातीत्यर्थः ततोब्रह्मचारिणः कर्तृत्वविवक्षायांयुज्यतेब्रह्मचारीयोगमितिभवति करणेनेति बहुलग्रह
णात्साधसिद्धिनत्वीत्यादौनभवति स्रवतिकुंडिकेतिनिष्क्रामउदकंनिष्क्रामयतीत्यस्मिन्नर्थेतल्पाक्रियत्वात्प्राप्तः कर्मवद्भा

वोत्निषिध्यते विसृजतीतिगम्यतेइति तथाचलोकेकथ्यते कृपणोसौ नाकंचित्स्रवतीति विसर्गेस्रवदानमुच्यतेइति तल्पाक्रियत्वाभावः ॥

गेयमनीयेतिगमसूत्रे ॥

३
भा· कै·
५५
59

भूषाकर्मेति कर्मधातुः क्रियावाची भूषाफलं च शोभात्वं कर्मणि गृह्यते इति कर्मस्था भूषा अलंकृतार्थं च भूषाग्रहणं अलंकृतानां च वक्ष्यमाणेन यक्चिणोः प्रतिषेधस्य सिद्धत्वात् तेनालंकुरुते स्वयमेव कन्या अलमकृत कन्येति भवति अवकिरत इति हस्ति नं कश्चित्पांस्वादिनाव किरति तत्रसौ कार्यान्तर्तत्वेन हस्ती विवक्ष्यते चिकीर्षत इति किरोति क्रियापेक्षमत्र कर्मस्थक्रियत्वमिच्छा तु कर्तृस्थैवाथी च्चकर्तोः प्राधान्यं तदर्थत्वादिच्छायाः नड यक्चिणोरिति आत्मनेपदविधावकर्मकार्य यानवोनि र्दिष्टा स्त्रे पदानभावित एपर्यास

भूषाकर्मकिरादीनां चान्यत्रात्मनेपदात् भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात् प्रतिषेधो वक्तव्यः भूषयते कन्या स्वयमेव अभूषत कन्या स्वयमेव मंडयते कन्या स्वयमेव अमंडत कन्या स्वयमेव किरतिम्नवकिरते हस्ती स्वयमेव अवाकीष्ट हस्ती स्वयमेव सन् चिकीर्षते कटः स्वयमेव अचिकीर्षिष्ट कटः स्वयमेव नडु हस्तनमीयक्चिणोः यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं कर्तव्यं णि कारयते कटः स्वयमेव अचीकरत कटः स्वयमेवा णिश्रि उच्छ्रायते दंडः स्वयमेव उदशिश्रियत दंडः स्वयमेव शिब्रूञ् ब्रूते कथा स्वयमेव अवोचत कथा स्वयमेव भारद्वाजीयाः पठंति यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानमिति ॥

कर्मकाभवंति तदाकर्मवद्भावात् प्राप्तौ यक्चिणोः प्रतिषिध्येते यथा विकुर्वते सैंधवा वल्गंतीत्यर्थः नान्यदा अन्यो वल्गयति तदा नेषां कर्मत्वं पुनस्तो कर्यातिशयात्कर्तृत्व विवक्षायां विकुर्वते सैंधवाः स्वयमेव व्यकृषत सैंधवाः स्वयमेवेति यक्चिणो भवतः इत्युच्यते गोरित्यत्राप्यंतर्भावितण्यर्थत्वात्कर्मवद्भावाद्यक्चिणोः प्राप्तिः ब्रूते कथेति वचनेशब्दप्रकाशनफलत्वात्कर्मस्थम् ॥ ५८

ऊषिरञ्जोः यकि प्राप्नोत्यश्यन् विधीयते तेनेन श्यनि जिनित्यादिरित्याद्युदात्तं पदं भवति श्यप्श्यनोर्निन्नमितितित्स्व स्वरेणाद्युदात्तः ऊर्ध्वं नीजं चेति सार्वधातुकवचनमिति सार्वधातुके विषये भूते श्यन्पर स्मैपदे भवतन्स्यर्थः ऊस्मानाऽऽति ताछीस्वचनेति चानप्र नत्वशान्

ऊषिरञ्जोः ऊषिरञ्जोः श्यन् विधाने सार्वधातुकवचनं ऊषिरञ्जोः श्यनन्विधाने सार्वधातुकग्रहणं कर्तव्यं अवचने हि लि
ङ्लिटोः प्रतिषेधः अक्रियमाणे हि सार्वधातुकग्रहणे लिङ्लिटोः प्रतिषेधो वक्तव्यः स्यात् चुकुषे पादः स्वयमेव ररंजेव
स्त्रं स्वयमेव रंजी एवं स्त्रं स्वयमेव कोषिषीष्ट पादः स्वयमेव क्रियमाणे चापि सार्वधातुग्रहणे कनीहक्रस्मानाः पादा इ
ति अत्रापि प्राप्नोति श्यनाचस्यादीनां बाधनं प्राप्नोति कोशिष्यते पादः स्वयमेव अकोषि पादः स्वयमेव रंक्ष्यते वस्त्रं स्वय
मेव अरंजि वस्त्रं स्वयमेव यनावक्तव्ये सार्वधातुकग्रहणं कर्तव्यमिति नकर्तव्यं प्रकृतमनुवर्तने क्व प्रकृते सार्वधातु
के यगिति यदि तदनुवर्तते पूर्वस्मिन्योगे किं समुच्चयः लेच सार्वधातुके चेति आहोस्विल्लग्रहणं सार्वधातुकविशेष
णं किं चातः यदि समुच्चयः कनीहभिंदानाः ऊसुल्ला इत्यत्रापि प्राप्नोति अथ लग्रहणं सार्वधातुकविशेषणं लिङ्
लिटोर्न सिद्ध्यति विभिदे ऊसुलः स्वयमेवं भित्सीष्ट ऊसुलः स्वयमेवेति अस्तु लग्रहणं सार्वधातुकविशेषणं ननु
चोक्तं लिङ्लिटोर्न सिध्यतीति लिङ्लिङ्ग्रहणमपि प्रकृतमनुवर्तने क्व प्रकृतं कास्प्रत्ययादाममंत्रे लिटि लिङ्याशि
ष्यङिति च एवं कृत्वा सोप्यदोषो भवति यदुक्तं कनीह ऊस्मानाः पादा इत्यत्रापि प्राप्नोतीति इहापि ल विशिष्टं सार्वधा
तुकग्रहणमनुवर्तते ॥

प्राप्नोति परस्मैपदं त्वा व यशिष्टं मन्यते

श्यनाचोक्ते विशेषविहितत्वादिति भावः ॥

यक्प्रतिषेधसंबंधेनेति तेनयत्रयकःप्राप्तस्यप्रतिषेधस्तत्रश्यन्परस्मैपदेभवतोनान्यत्रेति स्यादिविषयेनभवतः लावस्थायामेवे
ति अकृतेष्वेवलादेशेषुविशेषविहिताःस्यादयोभवंति शर्वेनैस्यश्यनोविरोधात् बाधितत्वात्संनियोगशिष्टपरस्मैपदमपिभवति।

३ भा॰ कै॰ ५॰ यदप्युच्यते श्यनाचस्यादीनांबाधनंप्राप्नोतीति यक्प्रतिषेधसंबंधेनश्यनंवक्ष्यामि नडुहस्नुननमांयक्चिणो ततःकुषिरजोः
60 श्यन् प्राचांयक्चिणोनभवतः ततःपरस्मैपदंचेति यथैवतर्हियकोविषयेश्यन्भवति एवंचिणोपिविषयेप्राप्नोति अकोपिपा
दःस्वयमेवअरंजिवसंस्वयमेव एवंतर्हिद्वितीयोयोगविभागःकरिष्यते नडुहस्नुनमांचिणभवति ततोयक् यक्चनभवति
दुहस्नुनमां ततःकुषिरजोःप्राचांयक्नभवति ततःश्यन्परस्मैपदंचेति अथवाअनन्तरहानिःकरिष्यते स्यतासीलृलुटोः
च्लिलुङि च्लेःसिच्भवतीति कर्तरिशप् स्यतासीलृलुटोःच्लिलुङि. च्लेःसिज्भवतीति दिवादिभ्यःश्यन् स्यतासीलृलु
टोः च्लिलुङि. च्लेःसिज्भवतीति कुषिरजोःप्राचांश्यन्परस्मैपदंच स्यतासीलृलुटोः च्लिलुङि. च्लेःसिच्भवतीति अ
यवांतरंगाःस्यादयःकातरंगता लावस्थायामेवस्यादयःसार्वधातुकेश्यन् धातोः आकुतोयंधात्वधिकारः किमातृ
तीयाध्यायपरिसमाप्तेः आहोस्वित् प्राग्लादेशात् धात्वधिकारः प्राक्लादेशात् प्राग्लादेशाद्धात्वधिकारः लादेशो।
हिव्यवहितत्वादप्रसिद्धिः अनुवर्तमानेहिलादेशोधात्वधिकारेव्यवहितत्वादप्रसिद्धिःस्यात् किंचस्यात् ॥ ।

धातोःस्वरितत्वप्रतिज्ञानादधिकारत्वमस्यज्ञायते नत्ववधिविशेषः अन्यथापिस्वरितेसतिनाधिकारोभवतीति व्याख्यानं राम॰ ५॰
स्व॰ तथापिदुर्लक्षत्वात्ज्ञापकेषुस्वरितत्वंधात्वधिकारनिवृत्त्यर्थंप्रतिज्ञातमितिष्टव्यमिति आकुतइति ॥ ॥

आद्येयोग इति तिप्तस्झीत्यत्र विकरणौ इति स्यादयोऽत्र विकरणा अभिप्रेता नशावादयस्तेषां सार्वधातुकाश्रयत्वाद् अकृतेऽल्लादेशे प्रा
प्त्यभावात् यदा तु सार्वधातुक इति विषयसप्तमी एतत्तदा कृतेऽपि ल्लादेशे शबादीनां प्राप्तिरस्ति द्वयोरेकारयोरिति यद्यप्येकस्या
आद्येयोगे न व्यवायो लिङः स्तु आद्येयोगे विकरणौर्व्यवहितत्वाल्लिङो न स्तु पचानिपठति इदमिहसंप्रधार्यं विकरणाः क्रियन्ता
मादेशाः इति किमत्र कर्तव्यं परत्वादादेशाः नित्या विकरणाः कृतेष्वप्यादेशेषु प्राप्नुवन्ति नित्यत्वाद्विकरणेषु कृतेषु विकरणै
र्व्यवहितत्वादेशा न प्राप्नुवन्ति अनवकाशास्तर्ह्यादेशाः सावकाशा आदेशाः कोऽवकाशः यच्चेल्लुग्विकरणाः स्तु विकरणाः
लिङ्लिटौ च न स्यादेत्वे दिष्टितां वैस्यादैत्वे यद्यपि पचेते यद्धादितं संज्ञानां पत्वं विपचते न ह्य विकरणैर्व्यवहितत्वात्तस्मात् एशः शित्वं
एकारस्य शित्कर्तव्यः किं प्रयोजनं शित्सर्वस्येति सर्वादेशो यथा स्यात् अक्रियमाणे हि शकारे एतस्मादिति नुनरस्य आदेः परस्येति
नकारस्यैत्वे कृते द्वयोरेकारयोः श्रवणं प्रसज्येत निर्हतेष्वनल्लादेशो यात्वधिकारे अलोऽन्त्यस्य विधयो भवन्तीत्येकारस्य एका
रवचने प्रयोजनं नास्तीति कृत्वा अन्तरेणापि शकारं सर्वादेशो भविष्यति यच्च लोटो विधत्ते न ह्य विकरणैर्व्यवहितत्वा
त्तस्मात् किं पुनस्तल्लोटो लङ्वत् एरुः सेर्ह्यपिच्च वाच्छन्दसीति यच्चाप्युक्तं लङ्लिटोस्तच्च न स्यात् किं पुनस्तत् नित्यं
ङितः इतश्च तस्थस्थमिपां तान्तन्तामः लिङः सीयुट् यासुट् परस्मैपदेषूदात्तो ङिच्चेति तस्मात् आह्लाद्यातोऽन्यत्र अधिकारः अ
कारः शित्कर्तव्यः किं प्रयोजनं शित्सर्वस्येति सर्वादेशो यथा स्यात् अनुवर्तमाने पुनर्ल्लादेशो धा
त्वधिकारे तस्मादिति नुत्तरस्य आदेः परस्येति ॥

तथाप्यादेशश्रवणाद्वारेणात्रस्यापि श्रवणप्रसंग इति भावः अकार इति यस्य यस्य स्थाने विधीयते ॥ ॥

यकारस्यात्वमिति ननु पचयमिति स्थिते परत्वादिट् प्राप्नोति नैष दोषः अकारो नित्यः कृतेपीटि प्राप्नोत्यकृतेपि इट् त्वकृते अकारे वलादित्वाभावा
त्. यकारस्यात्वे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्यात् येच पूर्वं च क्रमित्रमिति ननु चानिहत्वेपि लादेशो धात्वधिकारे अलों त्यस्य वि
ययो भवतीत्यकारस्याकारवचने प्रयोजनं नास्तीति कृत्वा तरेण यि शकारं सर्वादेशो भविष्यति अथाप्यदकारस्याकारस्याका
रवचने प्रयोजनं किं वक्तव्ये तत् अकारस्याकारवचनं समसंख्यार्थमिति आर्धधातुकसंज्ञायां धातुग्रहणं कर्तव्यं धातोः प
रस्यार्धधातुकसंज्ञा यथा स्यात् इह माभूत् वृक्षत्वं वृक्षतेति तस्माल्लादेशो धात्वधिकारे नानुवर्त्यः ननु चोक्तं आद्ये योगेन व्यवा
ये तिङः स्युरिति नैष दोषः आनुपूर्व्यात्सिद्धमेतत् नात्राकृते ष्वादेशेषु विकरणाः प्राप्नुवन्ति किं कारणं सार्वधातुके विकरणा उ
च्यन्ते न चाकृते ष्वादेशेषु सार्वधातुकं भवति येन र्हि नैतस्मिन्विशेषे विधीयन्ते के तु न स्तस्यादयः अत्रापि धातुग्रहणं विशेषणं धा
तोर्विहितस्य लस्येति यद्येवं विंदतीति णलादयः प्राप्नुवन्ति धातुनात्र विहितं विशेषयिष्यामः विदिनाआनन्तर्यं धातोर्विहि
तस्य लस्य तेनास्य विपर्यन्तं तरस्येति दहन्तार्हि अजहित्ष्यन् अजागरिष्यन् इति अभ्यस्तात् के स्नुस् भवन्तीति जुस्भावः प्राप्नोति
अत्रापि धातुनाविहितं विशेषयिष्यामः अभ्यस्तेनानन्तर्यं धातोर्विहितस्याभ्यस्तादनन्तरस्येति आनन्तर्ये तत्र कथं विशेषयिष्य
सि यदि तावद्धातुग्रहणं विहितविशेषणं आकारग्रहणमानन्तर्यविशेषणं अलुनन् अपुनन् इत्यत्रापि प्राप्नोति अथाकार
ग्रहणं विहितविशेषणं धातुग्रहणमानन्तर्यविशेषणं अपिबन् अजिघ्रन् इत्यत्रापि प्राप्नोति अस्त्वन्तर्हि धातुग्रहणं विहितविशे
षणं ननु चोक्तमलुनन्नपुनन्नित्यत्रापि प्राप्नोतीति नैष दोषः लोपे कृते न भविष्यति नात्र लोपः प्राप्नोति किं कारणं ईत्वेन बा
ध्यते नात्रेत्वं प्राप्नोति किं कारणं श्नाभावेन बाध्यते नात्रातिभावः किं कारणं जुस्भावेन बाध्यते नात्र जुस्भावः प्राप्नोति किं
कारणं लोपेन बाध्यते लोप ईत्वेन ईत्वं श्नाभावेन श्नाभावो जुस्भावेन जुस्भावो लोपेनेति चक्रकमव्यवस्थाप्रसज्येत ना
त प्राप्नोतीत्यनित्यः यद्यपि शक्नोनरस्य प्राप्त्या अकारस्यानित्यत्वं तथापि कृताकृतप्रसंगित्वान्नित्यत्वमस्त्येव न च शत्रान्तरप्राप्तिकृतमनि

नावन्येवेति कृत एव सिध्यन्ति कृत एव विकरणा इत्यर्थः आपन्नादिषूपदेशिवद्वचनादुपदेशिकाल एव उपसर्गस्यैनादेशो न भाव्यमिति भावः प्र
तिपादिकान्माभूवन्निति द्वितीयादिवदिति भावः साधन इति प्रकृतिवाच्यान्तरंगक्रियासाधनसंभवे शब्दान्तरवाच्यवदिदं रंगक्रियासाधने
न त्यदादयो न भविष्यन्ति द्वितीयादयस्तु प्रातिपदिकादेव विधीयमानाः शब्दान्तरवाच्यक्रियापेक्षा एव साधने वचनसामर्थ्याद्भवन्तीति भावः
स्वपादिष्विति येऽपभ्रंशरूपाः क्रियावचना आणवयत्यादिरूपास्तेभ्यस्त्यदादयो माभूवन् नहि तेषां तत्र पाठेन धातुसंज्ञा यास्ते॥
नावन्येवाङ्गेति भावेन भवितव्यं अन्येति भावे कृते लोपः लोपे न व्यवस्था भविष्यति यदप्युच्यते पशः पितव्यमिति क्रियते न्यास एव॥
कानि पुनरस्य योगस्य प्रयोजनानि प्रयोजनं प्रातिपदिकप्रतिषेधः प्रातिपदिकप्रतिषेधः प्रयोजनं धातोस्त्यदादयो यथा स्युः
प्रातिपदिकान्माभूवन्निति नैतदस्ति प्रयोजनं साधने त्यदादयो विधीयन्ते साधनं च क्रियायाः क्रियाभावात्साधनाभावः साध
नाभावादसत्यपि धात्वधिकारे प्रातिपदिकात्त्यदादयो न भविष्यन्ति स्वपादिषु स्वपादिषु तर्हि प्रयोजनं स्वपिति स्वपनीतिमा
भूत् अंगसंज्ञा च प्रयोजनं यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गमिति धातोरङ्गसंज्ञा सिद्धा भवति कृत्संज्ञा च कृत्संज्ञा च प्रयो
जनं धातोर्विहितः कृत्संज्ञो भवतीति उपपदसंज्ञा च प्रयोजनं तत्रैतस्मिन्धात्वधिकारे यत्सप्तमीनिर्दिष्टं तदुपपदसंज्ञं भवती
त्युपपदसंज्ञा सिद्धा भवति॥

धातोरत्वात् ततः स्वपितीति प्रयोक्तव्ये स्वप   तीति प्रयोगोऽपभ्रंशः ततः प्रत्ययोत्पत्तिर्माभूदित्यर्थः
अङ्गसंज्ञेति अस्ति धात्वधिकारे धातूपसर्गसमुदायस्य क्रियाविशेषवाचित्वात्ततः प्रत्ययविधाने तस्यैवाङ्गसंज्ञायां सत्यामडादि
प्रसंगः धातोस्त्विनेत्यादावित्यर्थः तत्रैतस्मिन्निति सत्यस्मिन्धात्वधिकारे तत्रोपपदमित्यत्र तच्छब्देन परामर्शादुपपद्यते नान्यथा॥

ऌ भा·कै· ९२ 62

यदयमिति यद्यविशेषेण धातुमात्रात्सिच् स्यात् तदाकरणे करोत्यर्थे विधीयमाने हेतुमत्यधिकरणे सिद्ध इति पुनस्तत्र णिचं न विदध्यादि
त्यर्थः चुरादिग्रहणेन प्रातिपदिकाद्धात्वर्थ इत्याद्यर्थं स्यादित्यज्ञापकं व्यपदेशिवद्वचनादिति धातुव्यपदेशो विद्यते एषां ते पचादयो।
धातुपाठपठिता व्यपदेशिनस्तेषु लुप्यकारणादयो वर्तन्ते यकः किन्त्वेन तेषां धातुत्वानुमानात् तदयमर्थः यदि धातुमात्राद्यक
क्रडुपपदसंज्ञेनावत्प्रयोजयतः अधिकारादप्येतेसिद्धे सुपादिषु तर्हि अङ्गसंज्ञा च प्रयोजनं धातुग्रहणमनर्थकं यङ्विधौ
धात्वधिकारात् धातुग्रहणमनर्थकं किं कारणं यङ्विधौ धात्वधिकारात् यङ्विधौ धातुग्रहणं प्रकृतमनुवर्तते तत्रावा।
प्यमनुवर्त्यं अनधिकारे ह्यङ्गसंज्ञाभावः अनधिकारे हि सति अङ्गसंज्ञाया अभावः स्यात् करिष्यति यदि तदनुवर्तते च
णिचुरादिभ्यो णिज्भवति धातोश्चेति धातुमात्रात्सिच् प्राप्नोति हेतुमद्वचनं तज्ज्ञापकमन्यत्राभावस्य यदयं हेतुमति चे
त्याह तत् ज्ञापयत्याचार्यो न धातुमात्रात्सिज्भवतीति इह तर्हि कण्ड्वादिभ्यो यक् भवतीति धातोश्चेति धातुमात्राद्यक् प्रा
प्नोति कण्ड्वादिषु च व्यपदेशिवद्वचनात् यदयं कण्ड्वादिभ्यो यग्भवतीत्याह तत् ज्ञापयत्याचार्यो न धातुमात्रा
द्यग्भवतीति अथवा कण्ड्वादिनेवात्र धातुग्रहणेन सम्भन्त्स्यामः कण्ड्वादिभ्यो धातुभ्य इति ॥

त्ययः स्यात् ततः कण्ड्वादिग्रहणमनर्थकं स्यात् तेषामपि क्रियावाचित्वात् धातुमात्राद्यकः सिद्धत्वात् अथवेति सामानाधिक
रण्येन संबन्धे संभवति सम्बन्धषष्ठ्या आश्रयणस्यायुक्तत्वादिति भावः आर्धधातुकसंज्ञार्थोऽप्ययं धात्वधिकारो नोपयुज्यते यङ्विधावेवो
धात्रस्यानुवृत्तस्य विहितविशेषणार्थत्वाज्जुगुप्सते तं भ्यामित्यादावार्धधातुकसंज्ञानिवृत्तेः सिद्धत्वात् यामिधातोरित्यतो ग्रहणीय।

॥ पं

राम· ९२

तत्रोपपदं स्थग्रहणमिति सप्तमीशब्देन स्वाहचर्यात्तत्रेषु सप्तमीनिर्दिष्टग्रहणं ब्धं न इति प्रश्नः यत्रैव सप्तमीति सत्यार्थसंभवे गौणग्र।
हणस्यान्याय्यत्वात्सप्तम्याएवोपपदसंज्ञास्यात् संज्ञाविधौ प्रत्ययग्रहणे न तदंतविधेः प्रतिषेधात् समासस्तु लोमर्थे पदविभावो यस्याना
त्रिदं तस्यैव स्यात् यत्रैवेति सप्तमीतिपदत्ववग्रहणे न स्थाने स्तितिसप्तम्यां जने ऊ इत्यादावेव स्यात् उपसर्जनादिसिद्ध्यर्थं कुंभकारादिषु नैव।
स्यादित्यर्थः स्थग्रहणमिति स्थग्रहणे सति सौत्र सप्तम्युपलक्षितं तस्य संज्ञाविधानात्सर्वत्र सिद्ध्यतीत्यर्थः अथ तत्रग्रहणमिति धातो।

तत्रोपपदं सप्तमीस्थं स्थग्रहणं किमर्थं तत्रोपपदं सप्तमीतीयत्युच्यमाने यत्रैव सप्तमी श्रूयते तत्रैव स्यात् स्तंबेरमः करो
जियः यत्र वा एतेन शब्देन निर्देशः क्रियते सप्तम्यां जनेर्डः इति इह न स्यात् कुंभकारो नगरकारः इति स्थग्रहणे पुनः क्रियमा
णे यत्र सप्तमी न श्रूयते यत्र वैतेन शब्देन निर्देशः क्रियते यत्र वान्येन सप्तमीस्थमात्रे सिद्धं भवति अथ तत्रग्रहणं किम
र्थं तत्रग्रहणं विषयार्थं विषयः प्रतिनिर्दिश्यते तत्रैतस्मिन्धात्वधिकारे सप्तमीनिर्दिष्टमुपपदसंज्ञं भवतीत्युपदसंज्ञा
सिद्धा भवति ॥

त्रिन्नवर्तनादस्मिन्नेव धात्वधिकारे उपपदसंज्ञा भविष्यतीति प्रश्नः तत्रैतस्मिन्निति तत्रग्रहणेनाप्यधिकारपदाग
मर्थस्य स्पष्टप्रतिपत्तिर्भवतीति भावः अथ वोपपदसंज्ञोत्तरत्राधिकारादत्रैव धात्वधिकारे भविष्यतीति प्रश्नः प्रतिसूत्रमधिका
रश्राश्रीयमाणे गौरवं स्यात् तत्रग्रहणे तु क्रियमाणे अनेनैव वाक्येन परिस्फुरणत्वात्संज्ञा विधीयत इति प्रतिपत्तिर्लाघवं भविष्य

२
भा॰कै॰
६२
63

समर्थवचनमिति इह पदात्रिकः प्रातिपदिकार्थः स्वार्थद्रव्यलिंगलक्षणस्तदाविभक्तिमंतरेण कर्मादियिकरणाद्युपपदं न भविष्यतीत्य
वश्यंणत्वत्रंत्वं विभक्त्यतन स्वपदविधित्वात्समर्थपरिभाषाया उपस्थानं भवत्येव वाक्यपक्षे पंचकपक्षे वा प्रातिपदिकस्यैव कर्मादित्वा
विन्वान्पदविधित्वाभावात्समर्थपरिभाषानुपस्थानात्समर्थवचनं कर्तव्यमिति भावः आह रकुंभमिति कुंभशब्द उपपदे करोतेरणप्रत्ययः स्या
त् उपपदसमासस्तु सामर्थ्याभावान्न स्यात् महान्तं कुंभमिति महत्त्वयुक्तस्य कुंभस्य करोतिना सामर्थ्यमस्तीति भावः यदि चात्र प्रत्ययः स्या
उपपदसंज्ञायां समर्थवचने उपपदसंज्ञायां समर्थग्रहणं कर्तव्यं समर्थमुपपदं प्रत्ययस्येति वक्तव्यं इह माभूदाहरकुंभं करोति कट
मिति अथ क्रियमाणे चापि समर्थग्रहणे महान्तं कुंभं करोतीत्यत्रापि प्राप्नोति न वा भवितव्यं महाकुंभकार इति भवितव्यं यदे
तद्वाक्यं भवति महान्कुंभो महाकुंभः महाकुंभं करोतीति महाकुंभकारः यदा त्वेतद्वाक्यं भवति महान्तं कुंभं करोतीति तदा न
भवितव्यं तदा च प्राप्नोति तदा माभूदिति यत्रावदुच्यते समर्थग्रहणं कर्तव्यमिति न कर्तव्यं धातोरिति वर्तते धातोः कर्मण
ण भवति न चासंबंधादेतद्भवति यस्य धातोर्यत्कर्मेति यद्यप्युच्यते क्रियमाणे चापि समर्थग्रहणे महान्तं कुंभं करोतीत्यत्रापि प्रा
प्नोतीति उपपदमिति महतीयं संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः कृतः पुनरेतत् लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः
करणे एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत उपोच्चारि पदमुपपदमिति यच्चात्रोपोच्चारि तत्पदं यच्च पदं तदुपोच्चारि यावता चे
त् तदा कुंभशब्दस्य कारशब्देन समासे कृते कारकार्थीभावान्महच्छब्देन समासो न स्यात् समुदायस्य वृत्तत्वादुपपदसमा
सेऽन्तर्नीयानस्य तु ग्रहणस्य निहतत्वात्पृथग्भावात्स्यादेवं नास्य मासाभावः न तत्पदमिति पदसमुदायत्वादिति भावः यच्च पद
मिति महान्तमित्येतत् कुंभमित्येतच्चाप्युपपदं भवति उपोच्चारि च न तथापि सापेक्षत्वादसामर्थ्यात्प्रत्ययो न सतिनि मित्तं भवति अन्व

२ २
ने॰ ने॰

राम
६२

पदविधिरिति पदनिमित्तत्वात्प्रत्ययविधेरिति भावः अयमुद्धृत इति इहक्वाचित्सापेक्षत्वे प्रत्ययो न भवति महान्तं कुम्भं करोतीति क्वचित्तु भवति
माणवकं मुण्डयतीति तत्र संदेहात्प्रश्नः अत्र न समर्थवृत्त्यवयवत्वे पि कर्मत्वमस्त्येव सत्यम् तत्तस्या निवर्तनात् प्रकृतिविवक्षायामिति प्रकृति
विकारयोरभेदविवक्षायां च्विर्विधीयते तत्रावश्यं विकारेण प्रकृतिविशेषापेक्षणीयः तदनपेक्षायां च्वेरभावात् ततश्च यथा महान्तं
कुम्भं करोतीत्यत्राण्न भवति एवं मृदं कुम्भं करोत्यादावपीत्यर्थः काशान्करोतीत्यत्र तु विशेषणं प्रत्ययो भवति तस्मिंस्तु तत्त्वे काशशब्दात्
पदविधिरयं भवति पदविधिश्च समर्थानां भवति तत्र सामर्थ्यं न भविष्यति अयमुद्धृत उपपदे किमणा भवितव्यं अकुम्भं कुम्भं क
रोतीति कुम्भीकरोति मृदमिति न भवितव्यं किं कारणं प्रकृतिविवक्षितत्वात् प्रकृतिविवक्षायां च्विर्विधीयते तत्सापेक्षत्वात्
त्र चासमर्थं भवति तर्हि इदानीमिदं भवति एकाम्य कटं काशकटीकारमिति इष्टमेवैतद्यो नद्येति यस्य निमित्तोपादानं च निमित्तोपा
दाने च कर्तव्यं निमित्तमुपपदे प्रत्ययस्य निवक्तव्यं अनुपादाने ह्यनुपपदे प्रत्ययप्रसंगः अक्रियमाणे हि निमित्तोपादाने अ
नुपपदेपि प्रत्ययः प्रसज्येत निर्देश इदानीं किमर्थः स्यात् निर्देशः संज्ञाकरणार्थः यदा उपपदे प्रत्ययस्तदोपपदसंज्ञा वक्तव्या
कृयोगे षष्ठीत्यस्याः षष्ठीति समासः समासस्तूपस्यैव चेष्टत्वेनोपात्तत्वात् काशानां कटीकार इति वाक्यं न भवतीत्याह निर्देश इति क
र्मणीति सप्तमीविज्ञानात्सत्येव कर्मणि प्रत्ययो भविष्यतीति भावः निर्देशः संज्ञाकरणार्थ इति यद्यन्वर्थसंज्ञार्थमनुनासिकत्वं प्रतिज्ञायते
तथार्थं निरपेक्षा कर्मणीत्यादिसप्तम्युपपदसंज्ञालिंगं सो त्री इति भावः अर्थापेक्षायां तु सप्तम्या मण् प्रत्ययस्याभिधेयं कर्मणि श्रुतिनित्ता
या च उपपदत्वेन प्रतीयेत अर्थानपेक्षत्वे च सप्तम्या धातोरण् भवति कर्मवोपपदसंज्ञमित्ययमर्थः स्यादिति कर्मणः प्रत्ययोत्पत्तिनिमित्तं इ

कर्म स्यात् पर्याय ५ २

तत्रवचनमिति तत्रैव सति प्रत्ययो भवति नासतीत्यत्रग्रहणाल्लभ्यते कथमिति चेत् उच्यते प्रत्ययइत्यत्रानुवर्त्तते तत्रायमर्थः सप्तमीस्थमु
भा॰ कै॰ पपदसंज्ञं भवति तत्रैवोपपदे प्रत्ययो भवतीति कृदतिङ् स्थानिवद्भावइति अतिङिति प्रतिषेधः स्वाश्रयामेव तिङः कृत्संज्ञां बाधितुमर्हत्

८५ तत्रवचनमुपपदसंज्ञासंनियोगार्थं तत्रवचने क्रियमाणे तदुपपदसंज्ञासन्नियोगार्थं भविष्यति कर्म्मण्यणित्येवधीयते तत्रव

64 प्रत्ययो भवतीति ननु चान्यदस्य तत्रग्रहणस्य प्रयोजनमुक्तं किं तत्रग्रहणं विषयार्थमिति अधिकारादप्येतत्सिद्धं कृदति
ङ् अतिङिति किमर्थं पचति करोति अतिङिति वाक्यमकर्त्ते कस्मान्न भवति पचति करोतीति धातोः परस्य कृत्संज्ञाप्रा।
कृ लादेशाद्वान्यधिकारः एवमपि स्थानिवद्भावात्प्राप्नोति अप्रयातिङि तव्यमाने यावन्नास्थानिवद्भावः कथमेवैतत्सि।
ध्यति प्रतिषेधवचनसामर्थ्यात् अथवा तिङ् विभाविनो लकारस्य कृत्संज्ञाप्रतिषेधः किं च स्यात् यद्यत्र कृत
संज्ञा स्यात् कृत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा स्यात् ङ्याप्प्रातिपदिकादिति स्वाद्युत्पत्तिः प्रसज्येत
नैष दोषः एकत्वादिषु स्वादयो विधीयन्ते नेह तिङोक्ता एकत्वादय इति कृत्वा उक्तार्थत्वान्न
भविष्यन्ति ॥

सहते तत्र निर्देशः कस्मात्तेन प्रसक्तो अनेन तस्य वि   धिर्वा भवति प्रतिषेधो वेति वचनादिति भावः प्रतिषेधेति अन्यथा राम॰
अनर्थकः प्रतिषेधः स्यादिति भावः अथवेति तिङ् भावी लकार एव तिङ् शब्देनोच्यत इति मूलोच्छिदेव कृत्संज्ञाप्रतिषेधेन क्रियते ॥ ८५

यवादय इति यथासाधनाश्रयसंख्याभिन्नैकवचनाद्युत्पत्तिस्तथैव तद्धितलिंगाश्रया टावादयः स्युरिति भावः स्त्रियामिति शब्दप्राप्तिरस्या
भावात्साधनाश्रयसंख्योपादानमस्ति तिङस्तस्य लिंगोपादानमिति भावः धातोरिति धात्वादेरित्यर्थः एकादेश इति ननु स्थानिवद्भाव
वयित्वात्परत्वादंतवद्भावेन भाव्यं नैष दोषः परशास्त्रस्येष्टवा विशिष्टत्वात् स्थानिवद्भाव एवांतवद्भावस्य बाधकः नन्वतिङ इति प्रत्या
ख्यायमाने पचेरन्निति प्रातिपदिकान्तत्वान्नकारलोपः प्राप्नोति मस्य रन्निति नकारोच्चारणसामर्थ्यान्न भविष्यति इदं तर्हि विचीया
टाबादयस्तर्हि तिङन्तान्मा भूवन्निति स्त्रियां टाबादयो विधीयन्ते न च तिङन्तस्य स्त्रीत्वेन योगोस्ति अणादयस्तर्हि तिङन्तान्मा
भूवन्निति अपत्यादिष्वर्थेष्वणादयो विधीयन्ते न च तिङन्तस्यापत्यादिभिर्योगोस्ति अथापि कथंचिद्योगः स्यात् एवमपि न
दोषः आचार्यप्रवृत्तिर्ज्ञापयति न तिङन्तादणादयो भवन्तीति यदयं कश्चित्तद्धितविधौ तिङ्ग्रहणं करोति अतिशायने तम
विष्ठनौ तिङश्च इह तर्हि पचति पठति ह्रस्वस्य पिति कृति तुग्भवतीति तुक् प्राप्नोति धातोरिति वचनात् एवमपि चिकीर्षतीत्यत्रा
पि प्राप्नोति अत्रापि शपा व्यवधानात् एकादेशे कृते नास्ति व्यवधानं एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भा
वाद्व्यवधानमेवेति इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये तृतीयस्याध्यायस्य प्रथमे पादे पंचममाह्निकम्
दिति कृत्यकारत्वाद्दीर्घो न प्राप्नोति एषोप्यदोषः सार्वधातुकप्रतिषेधो ज्ञापयत्यकृदिति प्रतिषेधस्तिङो न भवतीति यदि हि स्यात्
स्तनुयादित्यत्रापि सार्वधातुके कृत्प्रतिषेधेन दीर्घो न भविष्यतीति पृथक्सार्वधातुकप्रतिषेधे तिङो न भवतीति यदि
हि स्यात् स्तनुयाः अनर्थकः इत्युपाध्यायजैय्यटपुत्रकैय्यटविरचिते भाष्यप्रदीपे तृतीयस्याध्यायस्य प्रथमे पादे पंचममाह्निकम् ५

३
भा·कै·
९५
65

वासरूपोऽस्त्रियां कथमिति स्त्रियामित्यभिधेयसप्तमी वा स्यात् स्त्रियामित्यस्यैव वासरूपस्य निषेधः स्यात् स्त्रियामित्युच्चार्य प्रत्यया विधीयं
ते तेषु वासरूपो न भवतीति संदेहात् पृच्छति लव्येति अचो यदिति यत्तव्यादीनां नित्यं बाधकं प्राप्नोतीत्यर्थः व्यावक्रोशीति कर्म ॥

वासरूपोऽस्त्रियां कथमिदं विज्ञायते स्त्रियामभिधेयायां वाऽसरूपो भवतीति आहोस्वित् स्त्रीप्रत्ययेष्विति किं चातः यदि वि
ज्ञायते स्त्रियामभिधेयायामिति लव्या लवितव्या अत्र वाऽसरूपो न प्राप्नोति अथ विज्ञायते स्त्रीप्रत्ययेष्विति व्यावक्रोशी
व्यावचर्चीति न सिध्यति एवं तर्हि नैवं विज्ञायते स्त्रियामभिधेयायां नापि स्त्रीप्रत्ययेष्विति कथं तर्हि स्त्रीग्रहणं स्व
र्यिष्यते तत्र स्वरितेनाधिकारगतिर्भवतीति स्त्रियामित्यधिकृत्य ये प्रत्यया विहितास्तेषां प्रतिषेधो विज्ञास्यते किमर्
थं पुनरिदमुच्यते असरूपस्य वावचनमुत्सर्गस्य बाधकविषयेऽनिवृत्त्यर्थं असरूपस्य वावचनं क्रियते उत्सर्गस्य बा
धकविषयेऽनिवृत्तिर्यथा स्यात् तव्यत्तव्यानीयर उत्सर्गास्तेषामजन्ताद्यदपवादः चेयं चेतव्यमित्यपि यथा स्यात् नैतद
स्ति प्रयोजनं अजन्ताद्यद्विधीयते हलन्तात्ण्यद्विधीयते एतावन्तश्च धातवो यदुताजन्ता हलन्ताश्च उच्यन्ते च तव्यदा
दयस्ते वचनाद्भविष्यन्ति एवं तर्हि ण्वुल्तृचावुत्सर्गौ तयोः पचादिभ्योऽजपवादः पचतीति पचः पक्ता पाचक इत्यपि यथा
स्यात् एतदपि नास्ति प्रयोजनं वक्ष्यत्येतत् अजपि सर्वधातुभ्यो वक्तव्य इति एवं तर्हि ण्वुल्तृजच उत्सर्गाः तेषामिगुपधा
त्कोऽपवादः विक्षिपः विलिखः विक्षेप्ता विक्षेपक इत्यपि यथा स्यात् अस्ति प्रयोजनमेतत् किं तर्हीति ॥

व्यतिहारे णच् स्त्रियामिति णचा क्तिनो बाधः प्राप्नोतीत्यर्थः स्त्रियामित्यधिकृत्येति स्त्रियां क्तिन्नित्यस्मिन्नस्त्र्यधिकारे ये उत्सर्गापवा

राम
९५

नत्रोत्पत्तिर्वा प्रसंग इति वा सनूप इत्येतावद्धूयते तत्र वा ग्रहणेन किं भावो विकल्प्यतां असनूपो पवादो वा भवति पक्षे न भवती।
ति अथ बाधकत्वं विकल्प्यतां वा बाधको भवति पक्षे न बाधक इति तत्रानारंगत्वात्तत्रायाप्येक विकल्पः स्यात् यथोक्तं यत्रान्यत्
क्रियापदं न श्रूयते तत्रास्तिर्भवंतीपर इति ननु वहिरंगस्य बाधकत्वस्येन्तुत्पत्तेरेव विकल्पः स्यात् पक्षे तु न कश्चित्प्रत्यय उत्प

नत्रोत्पत्तिर्वा प्रसंगो यथा तद्धिते तत्र उत्पत्तिर्विभाषा प्राप्तेति यथा तद्धिते अत्र यदा विहितो विलिखेद् इत्येतत्त तदावि
दोपकरत्वेन इष्यते पक्षे न लभ्येत कृतं स्यात् तत्र न लभ्य किं कारणं यथा तद्धित इत्युच्यते तद्धिते पुच सर्वमेवोत्
सर्गापवादं विभाषा उत्पद्यते वा नवा सिद्धं त्वसनूपस्य बाधकस्य वा बाधकवचनात् सिद्धमेत् कथं असनूपस्य बा।
धकस्य वा बाधकवचनात् असनूपो बाधको वा भवतीति वक्तव्यं सिद्धाति सूत्रेण हि भिद्यते यथान्यासमेवास्तु ननु यो
क्तं नत्रोत्पत्तिर्वा प्रसंगो यथा तद्धित इति नैष दोषः अस्ति कारणं येन तद्धितेषु विभाषोत्पत्तिर्भवति किं कारणं प्रकृति
तत्र प्रकृत्यर्थे वर्तते

येनेत्यर्थः अस्तिति बाधकाभावे उत्सर्गस्यातिवार्य
नादिति भावः यद्येन दिति अपवादशास्त्रेणोत्सर्गशास्त्र
स्य बाधितत्वादपवादाभावपक्षे पुनरुत्सर्गस्याप्रवर्तनादिति भावः तत्र यथा अन इजिति विकल्पितेनेजा न्यूक्तेपक्षेऽण् न भवति अ
अपितु वाक्यमेव तथेहाप्यपवादाभावपक्षे प्रकृतिरेव क्रीदीनर्थानभिदध्यात् यथाग्निचिदित्यादौ क्विवादिलोपे कृते सिद्धं त्वि

ति नत्र बाधकाभावा उत्सर्गः प्रवर्तते ॥

ति बाधकत्वमिति अत्र विकल्पो विहितो यत्र बाधकस्य...

२ अन्येनेति दक्षस्यापत्यमित्यादावपत्यादिशब्देनेत्यर्थः इह पुनरिति केवला प्रकृतिः स्वार्थमपि नाभिधत्ते किं पुनः कर्त्रादिकमर्थमभि
भा· कै· धास्यति तथा हि प्रकृतिप्रत्ययसमुदाये प्रयुज्यमाने अन्वयव्यतिरेकाभ्यां प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययस्तु प्रत्ययार्थ इत्युच्यते
९६ अनन्यत्वं तु प्रत्ययात् प्रकृतिर्न किंचिदर्थं गमयति अथापि हि द्विषेः कर्तेति कर्त्रादिशब्दाः प्रयुज्यन्ते न तथापि करोतिक्रियापेक्षमपि
66 कर्तृत्वं प्रतीयते न तु द्विषिक्रियापेक्षमेव तस्मात्सामर्थ्याद्वाचकत्वं वहिरङ्गमपि विकल्प्यते यद्वेति समयस्यापि वाचकोऽस्ति
अन्येन च शब्देन प्रत्ययार्थोऽभिधीयते इह पुनर्न केवला प्रकृतिः प्रकृत्यर्थे वर्तते न चान्यः शब्दोऽस्ति यस्तमर्थमभिदधीते
ति कृत्वा अनन्यत्वात्त्रिर्न भविष्यति अथवा समयः कृतः न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्यय इति एतस्मा
त्समयादनन्यत्वात्त्रिर्न भविष्यति यद्येवं तस्य समयस्य कर्ता स एवेदमप्याह यद्यसौ तत्र प्रमाणं इहापि प्रमाणं भवितु
मर्हति प्रमाणमसौ तत्र चेह च सामर्थ्यं त्विह द्वयोः शब्दानां प्रयोगेन चानन्यत्वे सामर्थ्यमस्ति तेनानन्यत्वात्त्रिर्न भ
विष्यति कथं तर्हि तद्धिते चानन्यत्वे सामर्थ्यं भवति अन्येन प्रत्ययेन सामर्थ्ये केन षष्ठ्या ॥ ॥
तिभावः सामर्थ्यमिति अर्थप्रत्यायनाय शब्दाः प्रयुज्यन्ते तेन च प्रत्ययस्यानन्यत्वान्नावर्थः प्रत्याययितुं शक्य इत्यर्थः पूर्वस्मिन्नधि
द्वारे प्रकृतेरेव केवलायाः स्वार्थमात्राभिधानेऽपि सामर्थ्यं नास्तीत्युक्तं उत्तरत्र तु समयात्प्रयोग एव केवलाया नास्तीत्युच्यते
कथं तर्हीति समयात्केवलस्य प्रातिपदिकस्य तद्धितानन्यत्वे साधुत्वं न प्राप्नोतीत्यर्थः अन्येनेति दक्षस्यापत्यमिति षष्ठ्यन्त राम·
स्य प्रातिपदिकस्य प्रयोगेन केवलस्य इह तु कृदनन्यत्वे सत्यां केवल एव धातुः स्यात् तस्य च समयात्प्रयोगाभावः ॥ १ ९६

अथवेति असत्युपशाद्वेन भिन्नरूपत्वउच्यते नस्य च भिन्नरूपत्वं तु उत्सर्गापेक्षया भवतीति मतएव पदेऽभ्यनुज्ञायते नन्वरूपान्तराद्भिरित्यर्थः न
चैवास्तीति उत्सर्गविकल्पे अप्राप्तविभाषा अपवादविकल्पे न प्राप्तविभाषेति न कश्चिद्विशेषः अपवादवेलायामिति बाध्यत्वेन यावदु
त्सर्गो नापेक्ष्यते तावदपवादस्य प्रवृत्तिरेव नास्तीत्यर्थः उपदेशावस्थायामिति प्रत्यासत्तेर्न्यायादुपदेशावस्थायामसारूप्यमाश्रीयत
अथवा वस्तुमयमाश्रित्य वा विधिरुच्यते न चानन्यत्वेनीरूपवतीतेनानन्याद्भिर्न भविष्यति एवमभिकृतपतनत् अपवादो विभा
षा भविष्यति न पुनरुत्सर्ग इति न चैवास्ति विशेषो यदपवादो वा विभाषा स्यादुत्सर्गो वा अपि च सापेक्षो यं निर्देशः क्रियते वा
सरूप इति न चोत्सर्गवेलायां किंचिदपेक्ष्यमस्ति अपवादवेलायां पुनरुत्सर्गापेक्षत्वेन यो रूपवानन्यपूर्वो बाधकः प्राप्नोति
स वा बाधको भविष्यति कः पुनरसौ अपवादः यदि योऽरूपवानन्यपूर्वो बाधकः प्राप्नोति स वा बाधको भवतीत्युच्यते क्विबादि
षु समावेशो न प्राप्नोति ग्रामणीः ग्राममणोय इति न ह्येते रूपवन्तः एतेऽपि रूपवन्तः कस्यामवस्थायां उपदेशावस्थायां यद्ये
वं अनन्वयभिन्नेषु विभाषाप्रसंगः अनन्वयभिन्नेषु विभाषा प्राप्नोति कर्मण्यण् आतोऽनुपसर्गे क इति कविषये अणपि प्रा
प्नोति सिद्धमनन्वयस्यानेकान्तत्वात् सिद्धमेतत्कथं अनन्वयस्यानेकान्तत्वात् अनेकान्ता अनन्वयाः अथवा प्रयोगे असरू
पाणां वा विधिर्न्याय्यः प्रयोगे लादेशेषु प्रतिषेधः प्रयोगे लादेशेषु प्रतिषेधो वक्तव्यः ह्योऽपचदित्यत्र लङपि प्राप्नोति श्वः प
इत्यर्थः ह्योऽपचदिति लङ्ग्रहणं लकारप्रत्ययः लुङिन्वपातीदिति ईशाह इति भिन्नरूपत्वात् समावेशप्रसंगः यदयमिति परोक्षे लिडिति
लिटालङः समावेशोऽसारूप्यात्सिद्ध एव विनापि लिङ्ग्रहणेन विहितत्वल्लकाराणामसमावेशं ज्ञापयतीत्यर्थः ॥

अथवेति क्विवादयो न संगृहीताः प्रयोगे तेषां रूपाभावादित्यर्थः क्वचिद्य इति प्रयोग इत्यर्थः उपदेशो हि सर्वस्यैवासारूप्यमित्यसरूपग्रहणमन॥

१ भा॰कै॰ ६८ 67 अथवा प्रयोगे असरूपाणां वा विधिर्न सर्वमिष्टं संगृहीतमिति कृत्वा द्वितीयः प्रयोग उपास्यते कोऽसौ उपदेशो नाम उपदेशो चेतेः सरूपाः न
नु चोक्तमनुबन्धभिन्नेषु विभाषाप्रसंग इति परिहृतमेतत् इह तु मनुबन्धस्यानेकान्तत्वादिति अथैकान्तेषु दोष एव एकान्तेषु च न दोषः आचा
र्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमसारूप्यं भवतीति यदयं ददातिदधात्योर्विभाषां शास्ति अथवासरूपो वा बाधको भवतीत्युच्यते अपवा
दश्च नामानुबन्धभिन्नो वा भवति रूपान्यत्वेन वा तेनानेनावश्यं किंचित्त्याज्यं किंचित्संगृहीतव्यं तत्रानुबन्धकृतमसारूप्यं न त्वाश्रयितव्यं
यत्तु सारूप्यान्यत्वेनासारूप्यं तदाश्रयिष्यामः अथवा असरूपो वा बाधको भवतीत्युच्यते सर्वश्चासरूपः तत्र प्रकर्षगतिर्विज्ञास्यते सा
धीयो योऽसरूप इति कश्च साधीयः प्रयोगे चशब्दः कृच्च प्रयोगात् अथवा असरूपो वा बाधको भवतीत्युच्यते न चैवं सति कश्चिदपि
सरूपः तत एवं विज्ञास्यामः क्वचिदेऽसरूपा इति अनुबन्धभिन्नाश्च प्रयोगे सरूपाः अथ कथमिदं विज्ञायते अस्त्रियामिति किं स्त्रि
यां न भवतीत्याहोस्वित् प्राक् स्त्रियाभवतीति कश्चात्र विशेषः स्त्रियां प्रतिषेधे क्तल्युट्तुमुन्खलर्थेषु विभाषाप्रसंगः स्त्रि
यां प्रतिषेधे क्तल्युट्तुमुन्खलर्थेषु विभाषा प्राप्नोति कृदृक्षिते छात्रस्य शोभनं वजपि प्राप्नोति ल्युड् हसनं छात्रस्य शोभनं तत्र
पि प्राप्नोति वसनन्द इत्यतिमोक्तं ॥

र्थकं स्यात् कथमिति स्त्र्यधिकारविहितेष्वेव किं प्रतिषेधः परस्तात्स्त्र्यधिकारस्य भवत्येवा वासरूपवि राम॰
धिः अथ स्त्र्यधिकारात् प्राक् वासरूपविधिर्भवति स्त्र्यधिकारेण विच्छिद्यत इति प्रश्नः ॥ ॥ ६८

लिङ्लोटाविति लिङ् चेति लिङ् भवत्येव इच्छार्थेषु लिङ्लोटावित्यत्र लिङ्लोटोः सह निर्देशात् तत्रापि सहनिर्देशः कृतः लिङ् चेति नियमाल्लो
ट् न भविष्यतीति शक्यते वक्तुं ननु तव्यत् भावे कर्मे कर्मणो लिङ्लोटाविति भिन्नार्थत्वात् कुतो बाध्यबाधकभावः नैष दोषः भावेऽपि
लिङ्लोटौ प्रैषादिविधानमिति तद्रूपेण तया बाध्यबाधकभावोऽभिमतः आस्यते भोक्तुमिति भोजनार्थत्वादासनस्य पौर्वकाल्यमत्र गम्य
ते इति समानविषयत्वाद्बाध्यबाधकभावप्रसंगः क्त्वाभावे तत्रैव च लकारोत्पत्तिरत्रेति समानार्थत्वमपि विद्यते न त्वायं निर्णयः
लिङ्लोटावपि प्राप्नुतः खलर्थः ईषत्पानः सोमो भवता खलपि प्राप्नोति एवं तर्हि स्त्रियाः प्रागिति वक्ष्यामि स्त्रियाः प्रागिति वे
क्त्वार्थो वा वचनं स्त्रियाः प्रागिति चेत् क्त्वार्थो वा वचनं कर्तव्यं आसित्वा भुंक्ते आस्यते भोक्तुमित्यपि यथा स्यात् कालादिषु
तुमुन्विधाने वा वचनं कालादिषु तुमुन्विधाने वा वचनं कर्तव्यं कालो भोक्तुं कालो भोजनस्येत्यपि यथा स्यात् अर्हे तृज्विधा
ने अर्हे तृज्विधेयः इमे अर्हे कृत्या विधीयन्ते ते विशेषविहिताः सामान्यविहितं तृचं बाधेरन् नैष दोषः भावकर्मणोः कृत्या
विधीयन्ते कर्तरि तृच् कः प्रसंगो यद्भावकर्मणोः कृत्याः कर्तरि तृचं बाधेरन् एवं तर्हि अर्हे कृत्यतृचां विधाने अर्हे कृत्यतृचो
विधेयाः अयमर्हे लिङ् विधीयते स विशेषविहितः सामान्यविहितान् कृत्यतृचो बाधेत वासरूपो कृत्याः कृत्यसंज्ञायां
प्राङ् ण्वुल्वचनं कृत्यसंज्ञायां प्राङ् ण्वुल इति वक्तव्यं किं प्रयोजनं ण्वुलः कृत्यसंज्ञा याभूत् अर्हे कृत्यतृज्ग्रहणं ज्ञापकं
प्राक् ण्वुल्वचनानर्थकास्य यदयमर्हे कृत्यतृचश्चेति तृज्ग्रहणं करोति तज्ज्ञापयत्याचार्यः प्राक् ण्वुलः कृत्यसंज्ञा भव
तीति एवमपि ण्वुलः कृत्संज्ञा प्राप्नोति योगापेक्षं ज्ञापकं तव्यत्तव्यानीयरः केलिमर उपसंख्यानं केलिमर उपसंख्यानं
स्वाधिकारस्य परस्तादपि वासरूपस्य विधिर्भवति अर्हे कृत्यतृचश्चेत्यत्र तु कृत्यतृज्ग्रहणेन तस्यानित्यत्वं ज्ञाप्यते कृत्याः कृ
त्याः इत्येतावत्सूत्रमित्याह कृत्संज्ञायामिति योगापेक्षमिति ण्वुल्तृचावित्येतस्माद्योगात् प्राक् कृत्यसंज्ञाधिकार इत्येवं तृज्ग्रह

१
भा॰ कै॰
६८

भाष्यकारेणानुकर्मणिप्रदर्शितः वास्तुनिभवइति दिगादित्वाद्यत् प्रत्ययः नित्यानां शाखानां यथाकथंचिदन्वाख्याने कर्तव्यमितिमन्य
ते यथोक्तं उपादायापिदेयाप्रत्यात्न्पायाप्यन्वाचक्षते उपायानां च नियमो नावश्यमवतिष्ठत इति अवास्तव्य इत्यत्र स्वरभेदोपि नास्ति कृ
पचेलिमामाषाः पक्तव्याः भिदेलिमाः सरलाभेत्तव्याः वसेस्तव्यत् कर्तरिणिच्चवसेस्तव्यत् कर्तरि वक्तव्यः णिच्च भवतीति व
क्तव्यं वसतीति वास्तव्यः नह्विनोवा नह्विनोवाधुनरेष भविष्यति वास्तु निभवो वास्तव्यः अचोयत् यतिजनैरिति यतो नाव
आनुग्रहणं किमर्थं अजन्ताद्यथास्यात् हलन्तान्माभूदिति नैतदस्ति प्रयोजनं हलन्तात्ण्यद्विधीयते सबाधको भविष्यति य
थैव तर्हि ण्यच्चर्तवा पते एवं तव्यदादीनपि बाधेत अजग्रहणे पुनः क्रियमाणे अजन्ताद्यद्विधीयते हलन्तात्ण्यत् विधीयते ।
एतावेवनस्याधात वः यहुनाजन्ताद्धलन्ताच्च उच्यते च न तव्यदादयः नेव च ना द्भविष्यन्ति नैतदस्तिप्रयोजनं वासरूपेण तव्यदाद
यो भविष्यन्ति नैतदस्ति प्रयोजनं वासरूपेण तव्यदादयो भविष्यन्ति इदं तर्हि प्रयोजनं अजन्तभूतपूर्वमात्रादपि यथास्यात् ल
व्यं पव्यं आर्धधातुकसामान्ये गुणे कृते पि प्रत्ययसामान्येपि वान्तादेशे कृते हलन्तादिति ण्यत् प्राप्नोति नैष दोषः दित्संधितस्य
आर्धधातुकसामान्ये अकारलोपे कृते हलन्तादिति ण्यत्प्राप्नोति अजग्रहणसामर्थ्याद्यदेव भवति यतिजनेरुपसंख्यानं
यतिजनेरुपसंख्यानं कर्तव्यं जन्यं वस्तेन चान्यल्पमिदमच्यते नकिंचास्ति वतियति जनीनामुपसंख्यानमितिवक्तव्यं न
किनक्तं शक्षि शस्य चतिचत्यं यतियत्यं जनिजन्यं हनोवा वधच हन्तेर्धातोर्वा यद्वक्तव्यः वधइत्ययं चादेशः वध्यः घात्यः न
ह्विनोवा नह्विनोवाधुनरेष भविष्यति वधमर्हतीति वध्यः यदि नह्विनः समासो न प्राप्नोति अस्ति वध्यो मन्त्रस्तव्यइति यतिपुनः
त्वाकेस्तुतिनियदं तोदानन्तेविधीयते नदेव यथनोस्याद्यानदर्थ इत्यनेन अचोयत् यतिजनेरिति यतो नाव इति स्वरार्थं जनेर्यद्विधा
ने जन्यमितिरूपं तत्रण्यता पिसिद्ध्यतिजनिवध्योश्चेति हलिप्रतिषेधात् वधमर्हतीति दण्डादिभ्य इति यत्प्रत्ययः यदि न ह्विन इति तेन सह समा

राम॰
६८

स्वरेहि दोष इति अक्षिवयशाह्याख्यातिसतितित्त्वरितं इति स्वरितः असत्येन कृदन्तेन तु समासे कृदुत्तरपदप्रकृतिस्वरेण वयशाहः आद्युदात्तो भ
वति तच्चाक्षिवयशाह्यान्नाप्नोति दंडादिषु केवलस्य वयशाहस्य पाठात्तदन्तविध्यभावाच्च अजर्यं तयोरेवेनिवचनाद्भावे अजर्यशाहः प्राप्नो
ति अजर्यं संगतेनेति कर्तरि च संगत इष्यते अजर्यमार्यसंगतमित्यतः पृच्छति किं प्रत्युदाहृयत इति अजर इति कर्तर्ययं प्रत्ययो निया
त्यते ततो हं गविकलतायरिहाराय कर्तैव प्रत्युदाहरणे प्रदर्शनीय इति भावः गत्यर्थानामिति यद्यपि संगमनं संगतमिति भावे इह क्तो

स्वरे हि दोषः स्यात् अक्षिवय्यः एवं स्वरः प्राप्नोति अक्षिवय्य इति चेष्यते अचो गदमदचरयमश्चानुपसर्गे अनुपसर्गाच्चरेराङि
वा गुरौ अनुपसर्गाच्चरेरित्यत्र आङि चागुराविति वक्तव्यं आचार्योदेशः अगुराविति किमर्थं आचार्य उपनयमानः गदमदश्च
र्यः स्वामिवैश्ययोः स्वामिन्यन्तोदात्तत्वं च स्वामिनि अन्तोदात्तत्वं च वक्तव्यं अर्यः स्वामी अजर्यं संगते संगतमिति किं प्रत्युदाह
ह्रियते अजरः कंबलः अजनिनाकंबल इति किं पुनः कारणं कर्तृसाधनः प्रत्युदाह्रियते न भावसाधनः प्रत्युदाहार्यः एवं तर्हि
अजर्या कर्तरि अजर्यं कर्तरीति वक्तव्यं तत्र हि वक्तव्यं न वक्तव्यं गत्यर्थानां क्तः कर्तरि विधीयते तेनेन योगात् अजर्यं कर्तरि
भविष्यति गत्यर्थानां वै क्तः कर्मण्यपि विधीयते तेनेन योगादजर्यं कर्मण्यपि प्राप्नोति जीर्यतिरकर्मकः भावे तर्हि प्राप्नोति सं
गतग्रहणमिदानीं किमर्थं स्यात्

विहितस्तथापि गत्यर्थानां क्तप्रत्ययः कर्तरि दृष्टो गतो ग्रामं देवदत्त इति ततो गत्यर्थधातुसाहच
र्यादजर्यतिति कर्तरि नियातनमिति मन्यते जीर्यतिरकर्मक इति सोपसर्गस्य सकर्मकत्वे पीहानुपसर्गस्य निपातनादकर्मकत्वं बो
द्धव्यं द्रव्यकर्माभावाश्रयेण वाकर्मकत्वमुक्तं कालादिना तु सर्वस्यैव सकर्मकत्वं संगतग्रहणमिति तर्हि गमेर्भावस्य जीर्यतेर्भा
वेन सामानाधिकरण्यमुपपद्यत इति प्रश्नः ॥ ॥ ॥

१
मा॰ कै॰
६५
69

कर्तृविशेषणमिति वैयधिकरण्यमनयोः पदयोः स्यादिति भावः लोमानि हृष्यन्तीति तथा च हृष्टं लोमभिर्हृषितं लोमभिरिति वैयधिकरण्ये
पीढ्हिकल्पो भवति तस्मात्कर्तरीति वक्तव्यं अथवा सामानाधिकरण्यत्यागेन वैयधिकरण्यमाश्रयस्माद्युक्तत्वात् निपातनाद्वा कर्तर्ये
वप्रत्ययो भवतीति स्थितं पदस्यापि कस्य चैनेन हृ[illegible]ति अत्राधिकारस्य विच्छेदोऽवयपरिज्ञानेन वा सिंहावलोकितन्यायाश्रयणं वा तत्रा

कर्तृविशेषणं संगतग्रहणं संगतं कर्तृ चेद्भवतीति तद्यथा हृषेर्लोमस्विति लोमानि चेत्कर्तृणि भवंति अन्यथा पदः स्था॰
पिकस्य पदः स्थ्यनुपसर्गग्रहणं पदः स्थापि अनुपसर्गग्रहणं कर्तव्यं इह माभूत् प्रवाच्यं संवाच्यं तन्नहि कर्तव्यं न कर्तव्यं अनु
प॰ र्ग इत्यनिवर्तते एवं तर्हि अन्वाचष्टे अनुपसर्ग इत्यनिवर्तत इति नैतदन्वाख्येयं अधिकारा अनुवर्तन्त इति एष एव च न्यायः
यदुताधिकारा अनुवर्तन्त इति पदः स्थोभावे भावग्रहणं किमर्थं कर्मणि माभूदिति नैतदस्ति प्रयोजनं भवतिरकर्मकः
अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवंति तेनानुभाव्यमामं त्वर्णामित्यत्रापि प्राप्नोति एतदपि नास्ति प्रयोज
ने अनुपसर्ग इत्यनिवर्तते उत्तरार्थं तर्हि भावग्रहणं कर्तव्यं हनस्त च भावे यथा स्यात् स्वहत्यावर्तते इह माभूत् स्वघात्यो
वृषलइति हनः स्त च हनस्तवित्स्त्रियां छेदसि हनस्त चेत्यत्र वित्स्त्रियां छंदसि इति वक्तव्यः तां भ्रूणहत्यां निरहस्यात् =
चरण अस्यैनां भ्रूणहत्यायै च तन्र्थे परिग्रहणाः स्त्रियामिति किमर्थं अघ्नते दस्युहत्याय छंदसीति किमर्थं स्वहत्यावर्तते ८८

वस्य एव वक्तव्यो विशेषः एवमादौ तु प्रयोजनाभावादवक्तव्य इत्यर्थः भवो भावे भवतिरकर्मक इति न तु प्राप्त्यर्थः सकर्मकोऽस्ति
नैष दोषः प्राधान्यात्तन्त्रार्थस्यैवेह ग्रहणात् ननु कालादिकर्मणि प्राप्नोति अनभिधानात्कालादिकर्मणि न भविष्यतीति राम:
मन्यते हनस्त च दस्युहत्यायेति छंदस्येवैतत्प्रवंततत्सकं भाषायां तु स्त्रीलिंगमेव ॥ ॥ ॥ ६९

पतिलक्षणं अथ वेति पूर्वस्मात्कथं योऽस्यैव लक्षणस्य प्रदर्शनाय कथग्रहणं तेन पूर्वं कथं शब्दं दर्शितं स्त्रियां विद्यते कथं भावितीति ई
डवेदहशंसदुहान्यतश्चेति वार्ये शब्दस्याद्युदात्तविधानादेतज्ज्ञायते नत्र हीडिवेदिभ्यामात्मनेपदिभ्यां स्त्रीहचर्यो हशोद्भूतं ग्रहणमिति
गृह्यते तस्मादुपदेश इति ननु स्वरभेदो भवति कथमिति सत्याद्युदात्तं पदं पठ्यते तस्मात्तस्य सविते नैष दोषः तद्विषयस्यान्तिमं तस्यैवा
द्युदात्तविधानात् न लक्षणेनेति संहितायामेव नित्यत्वं पदविच्छेदस्य तु पौरुषेयत्वे न यावच्चार्थनिष्पत्त्याभावः तत्रावग्रहे
पतिलक्षणा स्त्रहेननुषः कथं शकाविति वर्त्तमाने पुनः कथग्रहणं किमर्थं कथं वेवयथा स्यात् यदन्यत् प्राप्नोति तन्माभूदिति किं।
वा एपन्त्राप्नोति एपन् श्रोत्रावश्यके एपन् स्तौतेः कथं पूर्वविप्रतिषिद्धमिति वक्तव्ये सपूर्वविप्रतिषेधो न पठितव्यो भवति अ
थवा हन्तस्त्विन् स्त्रियां छन्दसि चोदितः स न वक्तव्यो भवति कथं द्विधौ कृत्यग्रहणे कथं द्विधौ कृत्यग्रहणं कर्तव्यं इह माभूत् वाच्या
कत्विजः इति अंजेस्त्रोपसंख्यानं संज्ञायां अंजोस्त्रोपसंख्यानं कर्तव्यं संज्ञायां आज्यं यदि कथं वृद्धिर्न प्राप्नोति तस्माद
प्युपदेशः यदि एपडुपधालोपो न प्राप्नोति तस्मात् कथं वेव ननु चोक्तं वृद्धिर्न प्राप्नोतीति आङ्पूर्वस्य प्रयोगो भविष्यतीति य
दैवमवग्रहः प्राप्नोति न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यं यथालक्षणं पदं कर्तव्यं पतिलक्षणा
स्त्रहेन्नई च खनः दीर्घोच्चारणं किमर्थं न ह्रस्वखन उच्चेत काम्यपक्षसिद्धिः एवं आङ्गोन सिद्धं न सिद्ध्यति पत्वन्त कोर सिद्ध्यः।
कादेश इत्येकादेशस्यासिद्धत्वात् कृप्रसंगेन नैतदस्ति दर्यां तपदाद्योरेकादेशोऽसिद्धः नैव पदान्तपदाद्योरेकादेशः तस्मा
न क्रियते तदुक्तं हरिद्रूरनवग्रहात् इति हरिद्रूरित्यत्र किं हरिशाहरकारान्तः अथ हरिशाहस्तकारान्त इति देहात् ई च खनः दार्घो
च्चारणो भाष्यकारेण प्रत्याख्याने केचित्सूत्रेषु निर्देशेन द्वितीयस्कारो येविभाषेत्यात्वस्य पक्षे परत्वाद्भासस्य वा पनार्थ इत्याङ्कः
तदयुक्तं कथं सन्नियोगेन विधीयमानस्य त्वस्यान्तरंगत्वादात्वस्य नयकारादावुत्पन्ने विधीयमानस्याङ्गस्य बहिरंगत्वाद्विप्रतिषेधा

३ भा॰कै॰ ७० 70

भृञोऽसंज्ञायामिति किमर्थमिति क्रियमाणेऽपि प्रतिषेध इष्टं न सिध्यतीति प्रश्नः भार्येति गृहिण्या इयं संज्ञेति क्यबभावे ण्यत्प्रत्ययः
अनर्थक इति प्राप्तेरयं प्रतिषेधः आनन्तर्यात्तु लक्षणान्तरेण प्राप्तेः क्यब्विधानादिति भावः प्रतिषेध इदानीमिति प्रतिषेधविधानसामर्थ्या
ल्लक्षणान्तरप्राप्तस्यापि क्यपः प्रतिषेधो भवतीति भावः अस्त्री संज्ञेति संज्ञाप्यत इति संज्ञेति कर्मसाधनोऽत्र संज्ञाशब्दः ततो न स्त्रिया

भृञोऽसंज्ञायां असंज्ञाग्रहणं किमर्थम् भार्या भृञः संज्ञाप्रतिषेधे स्त्रियामप्रतिषेधोऽन्येन विहितत्वात् भृञः संज्ञाप्रतिषे
धे स्त्रियामप्रतिषेधः अनर्थकः प्रतिषेधः अप्रतिषेधः किं कारणं अन्येन विहितत्वात् अन्येन लक्षणेन स्त्रियां क्यप् वि-
धीयते संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः इति प्रतिषेध इदानीं किमर्थः स्यात् प्रतिषेधः किमर्थ इ-
ति चेदस्त्रीसंज्ञाप्रतिषेधार्थः प्रतिषेधः किमर्थ इति चेत् अस्त्रियां संज्ञास्ति तदर्थः प्रतिषेधः स्यात् अस्त्रीसंज्ञार्थमेतत्
स्यात् भार्या नाम क्षत्रिया सिद्धं तु स्त्रियां संज्ञाप्रतिषेधात् सिद्धमेतत् कथं स्त्रियां संज्ञाप्रतिषेधो वक्तव्यः संज्ञायां समजनिष
दनिपतमनविदषुञ्शीङ्भृञिणः ततो न स्त्रियां भृञ इति सिद्ध्यति सत्यं न तर्हि भिद्यते यथान्यासमेवास्तु ननु चोक्तं भृञः
संज्ञाप्रतिषेधे स्त्रियामप्रतिषेधोऽन्येन विहितत्वादिति नैष दोषः भाव इति तत्रानुवर्तते कर्मसाधनश्चायं अथवा यदनेन संज्ञाया
विधीयन्ते तेषु नैव विज्ञायते संज्ञायामभिधेयायामिति किं तर्हि प्रत्ययान्तेन चेत्संज्ञा गम्यत इति अपर आह संज्ञायां पुंसि [illegible]

स्वादुमि मान्तनिपातनं क्रियते। ईकाराभावार्थं। ईकारो मा भूदिति। स्वादुंकृत्वा यवागूं भुङ्क्ते स्वादुंकारं यवागूं भुङ्क्ते। च्व्यन्तस्य च मकारान्तार्थं॥०॥०

प्रतिविभाषाग्रहणमनर्थकं मे च। नासरूपत्वेनेन पक्षे क्त्वादीनां सिद्धत्वात्। ननु पुनरस्य लः समानादिसूत्रेण विहितत्वाद्विशेषविहितेन णमुल्सहितत-
मेव विशेषः णमुल्सहितक्त्वाविधौ विभाषासूत्रेऽहोपादीयमानानां पनार्थो संपद्यते। क्त्वाणमुलोः सह प्रत्ययविधीयते न च वासरूपविधिर्न भवतीति तेना-
भीक्ष्ण्यपोऽक्त्वादित्यल्लादिपो न भवति। न त्वपक्षे क्त्वाणमुल्विधीयते विभाषासूत्रे गृहीतमिति तार्थं ज्ञापयितुं नस्यमिति। कोऽप्यनुवादः कर्तव्यः॥ ॥स्वादुमि
णमुल्॥ ईकाराभावार्थमिति। मान्तत्वे भाविप्रत्ययविषये निपात्यमाने विरतानां मितत्वाद्दीर्घो न अमुणवचनादिति शेषं न भवतीत्यर्थः॥

न्नं न सवेति। समुत्रापि सर्वत्र तुमुन न सिध्यति। अनव्ययस्य स्वधिकारात् इति भावः। यद्येवं मांतत्वमेव निपात्यतां प्रत्ययस्तु खमुत्रेव विधेयः नेत्यह इति अव्ययार्थं मन्मांत
निपातनं स्यादिति। तेष्वसत्येव णमुलि तुमांतत्वमपूर्वं विधीयमानमोकारभावार्थं। अन्ततस्य चमकारान्तार्थं विज्ञापनेन अवश्यं चोत्तरार्थं णमुल विधेय इत्यलं विधिवो
दिहे यथेत्वितः॥ आचतुमुनरिति। पूर्वोक्तवाक्यार्थापेक्षया समुच्चयप्रतिपादनार्थः चशब्दः। न चेत्यलं खलु इमिमांतनिपातनं अपि सिद्धमपि च अव्ययसंज्ञार्थं। शकुयथा
सुन्तस्य चमकारान्तत्वं निपात्यते। अलंकृत्वा अलंकृत्वा भुंक्ते। स्वादुङ्कारं भुंक्ते। आचतुमुनुः समानाधिकरणे। आचतुमुनः प्रत्ययाः समानाधिकरणे च कर्त्वाः
वेन। अनुप्रयोगेन। किंप्रयोजनं। स्वादुंकारं वा यगृह्णन्त्यमतेदेवदत्तेनेति। दृक्कृतेस्त्रीयापयास्यात् किंकारणं न स्यात्। णमुलाभिहित इति। ननु च खमु
लि प्रत्ययेनानभिहितः कर्तेति कृत्वा नभिहिताश्रयो विधिर्भविष्यतीति तृतीया यादि सत्यमभिधाने वानभिधाने च खलु तत्त्वेनाभिधानमिति कृत्वाः नभिहिताश्र
यो विधिर्भविष्यतीति तृतीया प्राप्नोति किंकारणं। णमुलानभिहितेन कर्मेति। यदि पुनरयं कर्मणाभिविज्ञायेत। नेत्यर्थ। इह हि स्वादुंकारं यथा
ग्रं भुंक्ते देवदत्त इति यथा अनभिहिते तृतीया न स्यात् किंकारणं न स्यात्। णमुलाभिहितेन कर्मेति। ननु च खमुलि प्रत्ययेनानभिहितः कर्मेति कृत्वा नभिहिताश्रयो विधि
र्भविष्यतीति तृतीया यदि सत्यमभिधाने वानभिधाने च खलु तत्त्वेनाभिधानमिति कृत्वाः नभिहिताश्रयो विधिर्भविष्यतीति तृतीयाद्देवदत्तेन तृतीया प्राप्नोति किंका
रणं। णमुलानभिहितः कर्तेति। अथानेन का सामर्थ्यः। यत्तो स्त्रीभुज्यते देवदत्तेनेति। का सामर्थ्यः देवदत्तेन तृतीया यथा स्यात् किंकारणं न स्यात् तथाभि
हितः कर्तेति। ननु च खमुलि प्रत्ययेनानभिहितः कर्तेति कृत्वानभिहिताश्रयो विधिर्भविष्यतीति तृतीया। यदि सत्यमभिधाने वानभिधाने च खलु तत्त्वेनाभिधानमभिहि
कृत्वाः नभिहिताश्रयो विधिर्भविष्यतीति तृतीयाऽयादेवदत्तेन तृतीया प्राप्नोति किंकारणं। कायनभिहितं कर्मेति। यदि पुनरयं कर्मणाभिविज्ञायेत। नेत्यर्थः। इह
हि पक्वा आरनसुंक्ते देवदत्त इत्योदने तृतीया न स्यात्। किंकारणं न स्यात्। तथाभिहितं कर्मेति। ननु च खमुलि प्रत्ययेनानभिहितं कर्मेति कृत्वाः नभिहिताश्रयो
हि सत्यभिहितत्समुनगम्यते। अभिविधौ लपमाकारः। णमूलेति। अ सत्यामिनन्यनन्यत्रे … इति भावः। अनभिहिताश्रय इति। अनभिहित
राणपर्युदासन्याश्रीयते न तु प्रसज्यप्रतिषेध इति भावः। यदि पुनरिति। कर्मण्यपत्तः कर्मणि तिङ्बचनं यदि … इति भावः। अथानेनेति। आचतुमुन इत्यनेन वचनेने सर्थः

भा॰ के॰ पक्तो देवदत्त इति। भिन्नधात्वर्थविषयत्वभेदेऽपि वचनस्यास्य दर्शयितुं प्रयोजनमुपन्यासः कृत्सम्पदनमिति। यद्येवं पक्तोऽत्तुं भुङ्क्ते देवदत्तः पक्तोऽदनो भुङ्क्ते देवदत्ते

१३१ नेति काप्रत्ययेन कर्तव्यमं तोरनभिधानात्स्यात्कापक्षयात्तृतीयाद्वितीयैव स्यान्न भवतः। उच्यते। अत्र व्यामादिपक्षव्याख्याने प्रयाविशेषणत्वात्प्रधानं। विशेषणाभ्

131 पादे सत्यभिधाने चानभिधाने च तुल्यमित्वदनभिधानमिति कृत्वा नाभिहिताश्रयो विधिर्भविष्यतीति द्वितीया। देवदत्तेन तृतीया प्राप्नोति। किंकारणं। ला पुन

भिहितः कर्तेति। अथानेन तुमुन्नर्थः भोक्तुमादनः पक्तेत्देवदत्तेनेति। बाढमर्थः। देवदत्तेन तृतीया पथ्यास्यात्। किं च कारणं न स्यात्तुमुनाभिहितः कर्ते

ति। ननु च यदि विप्रत्ययेनानभिहितः कर्मेति कृत्वा नाभिहिताश्रयो विधिर्भविष्यति तृतीया। यदि सत्यभिधाने चानभिधाने च तुल्यमित्वदनभिधानमिति

कृत्वा नाभिहिताश्रयो विधिर्भविष्यति तृतीया। ओदने द्वितीया प्राप्नोति। किंकारणं। तुमुनानभिहितं कर्मेति कृत्वा। यदि पुनरयं कर्मविशेषाविवक्षा प्रयत्न। ते

वंशकं तु द्वितीया भोक्तुमोदनं पचति देवदत्त इति ओदने द्वितीया यदि सत्याभिधाने चानभिधाने च तुल्यमित्वदनभिधानमिति कृत्वानाभिहिताश्रयो विधि

र्भविष्यति द्वितीया। देवदत्तेन तृतीया प्राप्नोति किंकारणं। तुमुनानभिहितः कर्तेति। अथानेनेहार्थः पक्ता ओदनं पामो गच्छति देवदत्तेनेति। बाढम

र्थः। देवदत्तेन तृतीया पथ्यास्यात् किंकारणं न स्यात्। तयाभिहितः कर्तेति। ननु च यप्रत्ययेनानभिहितः + न स्यात्। किंकारणं न स्यात्तुमुनाभिहितं

कर्मेति। ननु च यदि विप्रत्ययेनानभिहितं कर्मेति कृत्वा नाभिहिताश्रयो विधिर्भविष्यति द्वितीया। + कर्तेति कृत्वानभिहिताश्रयो विधिर्भविष्यति तृती

या। यदि सत्यभिधाने चानभिधाने च तुल्यमित्वदनभिधानमिति कृत्वा नाभिहिताश्रयो विधिर्भविष्यति तृतीया। एतदप्यमोदने द्वितीया प्राप्नोति

ति। सदृहनदोषो न जायते। ननु हि वक्तव्यं तुमुनः समानाधिकरणादिति। न वक्तव्य। अप्रत्यपदहलाभावे भवंतीति भावे भविष्यतीति किं च

यमेतत्। न हि। कथमनुच्यमानं गंस्यते। तुमर्थं इति वर्तते। तुमर्थश्च कः। भावः॥ नात्व प्रधानं। ततः क्रियासाधन्यार्थो विशेषणत्वात्तदाकारको गु

णप्रधानभावः। तत्र प्रधान[illegible]भिधाने गुणाः क्रियाशक्तिरभिहितवदप्रकाशते प्रधानानुरोधात् गुणानां न्याय्यमपेक्षितत्वात्स्ययकत्वाद्दिदृक्षाका

योरंभाभावात्॥

वर्षप्रमाणम्॥ तस्माद्देवः इति। गोष्पदं प्रतीत्यातोनुपसर्गे क इति कप्रत्ययः। क्रियाविशेषणत्वाच्च कर्मत्वे नपुंसकत्वे। गोष्पदप्रं वृष्टो गोष्पदप्रं तावदपि सान्नादेः प्रयोग
सिद्ध्यर्थं मलोपो न विधेयः। एतेषां प्रयोगाणां भाष्यकारेणानभ्युपगमात्। अनभ्युपगमस्तु लोपप्रत्याख्यानान्यथानुपपत्त्या विज्ञायते गोष्पदपूरमित्यादे
घञ्चासिद्धत्वात् णमुलश्च स्यान्नञ्प्रत्याख्याने। स्वरे दोषप्रसङ्गात्। तथा हि। यदि करणे घञं विधाय षष्ठीतत्पुरुषः क्रियते तदा थाथादिस्वरेणान्तोदात्तत्वं भव
ति। भावे तु घञि ञित्स्वरेणाद्युदात्ते पूर्वपदप्रकृतिस्वरः। णमुलि तु लित्स्वरेण ककार उदात्तः। गोष्पदपूरं तु णमुल्यादिर्वा सिध्यति। गोष्पदप्रमित्यत्र तु नास्ति स्वरभेदः। अप्र
वर्षप्रमाणे ऊलोपश्चास्यान्यतरस्याम्॥ ॥ऊलोपश्चास्यान्यतरस्यां ग्रहणात्पाक्षिकमस्वं नु। कथं गोष्पदप्रं वृष्टो देव इति। प्रातिपूरणात्क्रमो। तस्माद्देवः यदे
कः विभक्तो नास्त्येव तां प्राप्नोति। अपि तन्त्र विभक्तयः तद्वृथा। एतेन गोष्पदप्रं इति॥ ॥करणे हनः॥ ॥हनः करणे अनर्थकं वचनं हिंसार्थेभ्यो ण
मुल्विधानात्। हनः करणे अनर्थकं वचनं। किं कारणं। हिंसार्थेभ्यो णमुल् यथा स्यात्। अपि पुनरयं न चिहूं ते रहिंसार्थः पदार्थो विधिः स्यात् सवि
धानात्। अर्थवत्तु हन्तेर्णमुल्वचनं। कोऽर्थः। अहिंसार्थस्य हन्तेर्णमुल् यथा स्यात्। अस्ति पुनरयं न च हिंसार्थे हन्ते रहिंसार्थे पदार्थो विधिः स्यात् अस्तो
त्याह। पाण्युपघातं वेदिं हन्ति। नित्यसमासार्थं च हिंसार्थादपि हन्तेरनेन विधिरेषितव्यः। कथं पुनर्नित्यतापि हिंसार्थाद्धन्तेरनेन विधिर्लभ्यः। अ
नेनानुक्ते नेति। तेन स्यात् विप्रतिषेधेन। हन्तेः पूर्वविप्रतिषेधो वार्तिके वक्ष्यते। यस्य नित्यसमासार्थं वचनं। तत्रापि पूर्वाचार्यैः हिंसार्थाद
पि हन्तेरनेनैव विधिर्भवतीति॥ ॥अधिकरणे बन्धः॥ ॥इह कस्मान्न भवति ग्रामे बद्ध इति। एवं वक्ष्यामि। अधिकरणे बन्धः संज्ञायां ततः कर्त्रोर्जीवपु
रुषयोर्नशिवहोः इति। कथं महालिकाबन्धं बद्धः। उपमाने कर्मणि चेत्येवं भविष्यति॥ ॥तिर्यच्यपवर्गे॥ अपवर्गो यो निर्देशः। तिर्यक्कृत्वेति भवितव्यं सौ
त्रो निर्देशः॥
सपेयाथा हि स्वरेणान्तोदात्तत्वात्। णमुलि ऊकारलोपपक्षे पूर्वस्योदात्तमाजोः भावात् कृत्स्वरेणान्तोदात्तत्वात्॥ करणे॥ बाहुल्येन हन्तेः
हिंसार्थो दृश्यते इत्यमत आह। हन इति। हन्तेः पूर्वविप्रतिषेध इति। यदेवं हिंसार्थानामित्यत्र उपघातेन गाः कालयतीति उदाहरणं नोपपद्यते। नैष दोषः। प॥
चैव धात्वर्थः सामान्यविशेषभावेनाविषमामोऽविशेषणं विशेष्याभावमनुभवति सामान्यविशेषः यथा दृष्टपर्यायात् अनुप्रयोग इति वचनात् अन्यत्रापि अन्यधात्वर्थे
संबन्धे हिंसार्थानामित्यनेनैव णमुल् भवति॥ अधिकरणे। ग्रामे बद्ध इति। णमुल्समतिग्रामबन्धं बद्ध इति प्राप्नोति। निर्देशात् सौत्रो निर्देश इति अनुप्रयोगात् पदि

भा॰वृ॰
१३२
132

नाधार्थे॥ ॥हेतुमति चेति। यदाहि हेतोरभ्रधर्मयुक्तस्तादृशो प्रत्ययप्रसङ्गः। तदैतदर्थं ग्रहणस्य प्रयोजनं। आहेशपक्षे तु स्यान्निवृत्तौ वा ग्रहणे न्यग्रहणात्सिध्यति। तथा
वधमुक्तेन स्वार्थे दर्शनमिति प्रत्ययदृष्टा हार्ये। हेतुमति चेति। नार्थमप्यर्थग्रहणं कर्तव्यं। अन्यथापि निरनुबन्धकपरिभाषया नाञोग्रहणं न स्यात्॥ ॥कृत्तेः॥ ॥
विमर्थमिति। वृक्ष्यमाणाभिप्रायः अनादेशा इति। एतद्वचनेनार्थो नादिश्यते तत्र प्रत्यासत्त्या स्वार्थ एव प्रत्ययो भवति। यमिच्छतीति। अन्यस्मिन्नर्थे यदि
सेतावत्तस्ते कर्तव्यं। धातोरर्थं न भवतीति तत्राभिधेयार्थं तावद्वृद्धावेव यत्र भविष्यति। ततः परत्वाद्विशब्दः शर इति हेतौ यस्ते कर्तव्यं। ननु अभाव इति न कर्तव्यं। द्वियमा
नाधार्थप्रत्यये च्व्यर्थे॥ ॥अर्थग्रहणं किमर्थं। नाधाप्रत्यय इत्येतावत्युच्यमाने इहैव स्यात्। द्विधा कृत्येति। इह च न स्यात्। द्वैधं कृत्वा। अर्थग्रहणे पुनः क्रियमाणे
न दोषो भवति। नाधार्थप्रत्यये सिद्धं भवति। यच्चान्यत्तेन समानार्थः। अथ प्रत्ययग्रहणं किमर्थं। इह मा भूत् हिरुक् कृत्वा। पृथक् कृत्वा॥ अन्वच्यानुलोम्ये
चपुक्तो यं निर्देशः अनूचोति भवितव्यं। सौत्रो यं निर्देशः॥ ॥कर्तरि कृत्॥ ॥किमर्थमिदमुच्यते। कर्तरि कृद्वचनमनादेशे स्वार्थविज्ञानात्। कर्तरि कृतो
भवन्तीत्युच्यते। अनादेशे स्वार्थविज्ञानात्। अनादिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति। तद्यथा। गुप्तिज्किद्भ्यः सन्। यावादिभ्यः कन्निति। एवमिमे प्रत्ययाः कृ-
तः स्वार्थे स्युः। स्वार्थे मा भूवन्। कर्तरि यथा स्युरिति। एवमर्थमिदमुच्यते। नैतदस्ति प्रयोजनं। यमिच्छति स्वार्थे आहोस्वित् भावे घञ् भवतीति। कर्मणि तर्हि मा
भूवन्निति। कर्मण्यपि यमिच्छति आहोस्विद्धः कर्मणि च भवन्तीति। करणाधिकरणयोस्तर्हि मा भूवन्निति। करणाधिकरणयोरपि यमिच्छति। आह तत्। ल्युट्
करणाधिकरणयोर्भवतीति। संप्रदानापादानयोस्तर्हि मा भूवन्निति। संप्रदानापादानयोरपि यमिच्छति। आह तद्दाशगोघ्नौ संप्रदाने। भीमादयोऽपा-
दाने इति। यदिदानीमतोऽन्यः प्रत्ययः शेषः सोऽन्तरेणापि वचनं कर्तर्येव भविष्यति। तदेवं तर्हि प्रयोजनं। स्वार्थे मा भूवन्निति। ननु चोक्तं यमिच्छति स्वार्थे
आह तत्। भावे घञ् भवतीति। अन्यः स्वार्थे वा स्यात् प्रकृत्यर्थात्। अन्ये नेदानीमाप्यंतरे भावे स्युः। तत्र मा भून्निति कर्तृग्रहणं। कः पुनरेतयोर्विशेषः॥ ०॥
णं तु नियमार्थं भविष्यति घञेव भावे नान्य इति। ततो धात्वर्थासिद्धे कर्तरि कृद्भविष्यति नार्थः स्वार्थेन सार्थः कर्मणोपि। तस्यापि धात्वर्थे नाक्षेपादिति भावः। घः कर्म-
णि श्रूयन्ते इति। कृत्येव कर्मणि नान्य इति नियमो विज्ञायते। यद्येवं कर्मणो नियमाः [illegible] स्वरूपेणानियत इति इकारककारान्तरेपि कृत् प्राप्नोति। नैष दोषः। एवमपि
हं वाक्यं। घः कर्मणि श्रूयन्ते इति तेन च कर्मणि विधीयमानः प्रत्ययः कारकान्तरे स्यात्। अथ वा हितोयो नियमः परिशिष्यते। कर्मण्येव श्रूयन्ते इति। यदिदानीमिति। ननु कर्तरि भुवः
रिव समुच्चयत्वे कृत्रौ कर्तरि [illegible] तयोरिति तत्तु रिनियमः प्राप्नोति। नैष दोषः। उभयत्र करणानि हास्यात् कृते श्रुति विधिप्रयोजनेन नियमार्था॥ ०० ॥

उक्त इति सार्वधातुके यगित्यत्र बाध्याभ्यान्तरयोर्भावयोर्विशेषो दर्शितः नन्वचेति एधुनादिषु करणादिरर्थो विशेषविहितत्वात्कर्तुर्बाधको भविष्यतीति
भावः नानावाक्यत्वादिति इह ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यभिन्नकालत्वादेकं वाक्यं विशिष्टस्य दानस्य प्रतिपादकमिति तक्रेण दधि बाध्यते यदा
तु कालभेदेन वाक्यद्वयमुच्चार्यते पूर्वाह्णे ब्राह्मणभोजनप्रकरणे दधि ब्राह्मणेभ्यो दीयतामिति अपराह्णे तु तक्रं कौण्डिन्याय दीयतामिति तदा तक्रेण दधि न बाध्यते न
थेहापि कालभेदेन वाक्यद्वयोच्चारणाद्बाध्यबाधकभावो नास्तीत्यर्थः यत्त्विणादिकाः केयघेकं वाक्यं तच्चेदं तत्तत्स्वछेषः अपथ्य नानावाक्यान्तरगतदपवादैः सुक्तं नद

उक्तो भावभेदे भाष्ये अस्ति प्रयोजनमेतत् किं तर्हीति तत्र एधुनादिप्रतिषेधो नानावाक्यत्वात् तत्र एधुनादीनां प्रतिषेधो वक्तव्यः एधुनादयः कर्त्तरि मा
भूवन्निति ननु च करणे एधुनादयो विधीयन्ते तेन कर्त्तरि न भविष्यन्ति तेनत्वचकरणे स्युः अनेन च कर्त्तरि ननु चापवादत्वात् एधुनादयो बाधकाः स्युः न स्यु
ः किं कारणं नानावाक्यं तच्चेदं च समानेवाक्ये चापवादैरुत्सर्गा बाध्यन्ते नानावाक्यत्वात् बाधनं न प्राप्नोति [20] तद्धद्युच्चक्रसेष्वेवकारकरणं एकं च कृत्त्वात्कसे
ष्वेवकारः क्रियते तयोरेव कृत्सञ्ज्ञकत्वलर्थी इति भावे चाकर्मके ष्य इति किं प्रयोजनं तद्वद्भव्याद्यर्थं भव्यादिषु समावेशः सिद्धो भवति गेयो माणवकः सा
म्नां गेयानि माणवकेन सामानीति अपि देवतयोस्तकृत्सञ्ज्ञिः समावेशवचनं ज्ञापकम समावेशस्य यद्यं कर्त्तरि च र्षिदेवतयोरिति सिद्धे सति समावेशार्थे
चकारं शास्ति तत् ज्ञापयत्याचार्यः न भवति समावेशः इति । किमर्थं तर्हि कृत्सेष्वेवकारः क्रियते एवकारकरणं च चार्थे एवकारकरणं च चार्थे द्रष्टव्यं तयो
संभवाश्रयेण यद्दं गस्येतीणपेक्षावयवावयविसंबंधे षष्ठी तदा स्थानषष्ठ्यभावादल्लोसस्ये सस्यानुपस्था ॥ भावकर्मणोः कृत्सा भवंति भव्यादीनां कर्त्तरि च ॥ ॥
नं तदेव चापवादत्वं एधुनादयस्तु कृतत्वादनेन कर्त्तरि स्युः करणादिश्रुत्याचकरणादिषु तत्रानेकस्यार्थस्य युगपदभिधानासंभवात्पर्यायः स्यात् कदाचित्कर्त्तरि कदाचि
त्करणादिषु तद्वच्चेति योयमर्थः उक्तः तेन तु तुल्यमेवकारकरणमित्यर्थः तथा हि कृत्वात्कर्त्तरि कृत्सादयः प्राप्ताः एवकारेण कर्त्तुरपकृष्यन्ते भावकर्मणोरेव यथा स्यु
॥ रित्येवमर्थमित्यर्थः भावे चाकर्मके ष्य इत्यनेनाधिकारसहितं वाक्यं दर्शयति ॥ ॥

किंप्रयोजनमिति एवकारेणान्यत्रसमावेशज्ञापने न किं प्रयोजनमिति प्रश्नः तच्च भव्याद्यर्थमिति भव्यगेयादिसूत्रे गेयग्रहणं न कर्त्तव्यं न दंतरेणापि भव्यादयः कर्त्तरि भवंतीत्यनेन समावेशज्ञापनादेवकारकरणाद्वा वृत्कर्मत्वेन वाधिष्यते इत्यर्थः इदानीं तत्र खलु नादिप्रतिषेध इत्यस्य परिहारमाह ऋषिदेवतयो रिति कृद्भिरिति जातौ बहुवचनं अत्र च यथासंख्यं वार्त्तिककारस्यानभिमतं यथासंख्ये हि च शब्दस्य ज्ञापकत्वं न स्यात् समावेशाभावात् भव्याद्यर्थ मिति भव्यगेयादिसूत्रे न कर्त्तव्यं भवतीत्यर्थः अन्येन तु कृत्सार्थयोः नभिधानात्कर्त्तरि न भविष्यतीति भावः इदानीं भाष्यकारो वार्त्तिककारूपेणाह यत्ता

किंप्रयोजनं तच्च भव्याद्यर्थं भव्यादिषु समावेशः सिद्धो भवति गेयो माणवकः साम्नां गेयानि माणवकेन सामानीति यत्तावदुच्य ते ऋषिदेवतयोः कृद्भिः समावेशवचनं ज्ञापकम् समावेशस्येति नैतज्ज्ञापकसाध्यं अपवादैरुत्सर्गा बाध्यंत इति। एष एव न्यायः य दुतापवादैरुत्सर्गा बाध्येरन् ननु चोक्तं नानावाक्यत्वात् बाधनं न प्राप्नोतीति नैव विदेशस्थमिति कृत्वा नानावाक्यं भवति विदेश स्थमपि सदेकं वाक्यं भवति तद्यथा द्वितीये ध्याये लुगुच्यते तस्य चतुर्थषष्ठयोरलुगुच्यते ऽपवादः पदमुच्यते एवकारकरणं च चार्थमिति॥

वरिति नैव विदेशस्थमिति। न कालभेदान्नानावाक्यत्वं भवति। शास्त्रे विदेशस्थानाम प्यंगांगिभावमानामाकांक्षावशादेकवाक्यदर्शनात् देशग्रहणं चात्रकालस्योपलक्षणं शाद्वे क्रमस्य कालकृतत्वात्चतुर्थषष्ठयोरिति चतुर्थे गोत्रेऽलुगचीति षष्ठे त्वलुगुत्तरपद इति तदुक्तं हरिणा अनेकाख्यातयोगे
पि वाक्यं न्यायापवादयोः एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितं नियमः प्रतिषेधश्च विशेषश्च तथा परैः। द्वितीये योलुगाख्यातस्तत्षष्ठे मलुकं विदुरिति॥

कथमिति एवकारस्य लौकिके प्रयोगे न क्वचिद्व्यापारो दृष्ट इति भावः उत्तरमिति कर्त्तरि कृदित्यस्मादुत्तरमित्यर्थः तद्येति भव्यगेयादिसूत्रे वेति न कर्त्तर्येव भ
वतीत्यर्थः यदयमिति आदिकर्मणि क्तः कर्त्तरीत्येतावदस्तु नार्थश्च शब्देन समावेशोऽप्येवकारस्तापितो भविष्यति कृतस्तु च शब्दो ज्ञापयति आदिकर्मणीति स

कथं पुनरन्यो नामान्यस्यार्थे विधीयते कथमेवकारः स्वार्थे वर्त्तते स एष एवकारः स्वार्थे वर्त्तते किं पुनः प्रयोजनं ज्ञापकार्थं किं ज्ञाप्यं
एतत् ज्ञापयत्याचार्यः इत उत्तरं समावेशो भवतीति किमेतस्य ज्ञापने प्रयोजनं तत्र भव्याद्यर्थं भव्यादिषु समावेशः सिद्धो
भवति गेयो माणवकः साम्नां गेयानि माणवकेन सामानीति यद्येतज्ज्ञाप्यते इहापि समावेशः प्राप्नोति दाशगोघ्नौ संप्रदा
ने भीमादयोऽपादान इति अत्रापि सिद्धं भवति यदयमादिकर्मणि क्तः कर्त्तरि चेति सिद्धे समावेशे समावेशार्थं चकारं शास्ति तज्ज्ञा
पयत्याचार्यः प्रागमुतः समावेशो भवतीति किं पुनरयं प्रसयनियमः धातोः परः अकारः अकशब्दो वा नियोगतः कर्त्तारं ब्रूते क
१ तसंत्तत्रश्च प्रसयसंज्ञस्येति॥ श्री ॥७॥ ॥

स्मात्सूत्रात्परेषु योगेषु समावेशो न भवतीति किं पुनरिति सिद्धे शब्दार्थसंबन्ध इति यदुक्तं तत्स्मारयितुं विचार्यते प्रत्ययनियम इति धातोः परः कृत्प्रत्ययः कर्त्तरि
वर्त्तेतामिति कर्त्तृलक्षणेऽर्थे कृत्प्रत्ययो नियम्यते नियोगत इति कर्त्तरि कृदित्यस्मादाचार्यनियोगादित्यर्थः ॥ कार्यशब्दाभ्युपगमे चास्य पक्षस्यासंभवः॥ ॥

आहोस्विदिति निसशब्दार्थसंबंधानुपगमनिबंधनोयंप्रश्नः । यः स्वभावतः कर्त्तरि वर्त्तते स एव कृत्संज्ञो नान्य इति कृत्संज्ञा नियम्यते यद्येवं खलु नाडीनां कृत्संज्ञा न प्राप्नोति नैष दोषः एतत्सूत्रस्यापारो नियम्यते करणे खल्वित्यस्यादावप्ययमेव विचारः । किमयमर्थः करणे खलु न्वर्त्तेतामिति । उत यः स्वभावतो वर्त्तते तत्स्य साधुत्वमिति कृत्संज्ञा तु प्रतिप्रत्ययमधिक्रियमाणात्खलु नादिषु प्रवर्त्तते एव काष्ठभिद् ब्राह्मण इति अप निसशब्दानुपगमे काष्ठभेद इत्यत्राप्यण् प्रत्ययो वचनादेव कर्त्तारमाचष्टे उसाध शब्द पक्षे चाकारणानां विशेषाभावाद् ब्राह्मणशब्दाकारस्यापि कर्त्तरि नियोगलं प्राप्नोति आचार्यनियोगाच्च कर्त्तारं ब्रुवतः कृत्प्रत्ययसंज्ञाप्रसंगः तत्र कृत्संज्ञायां सत्यां साधुसन्ति प्रसंगः प्रत्ययसंज्ञायां च सत्संज्ञान्निर्बंधनां गहंज्ञा स्य

आहोस्वित्संज्ञानियमो धातोः परः अकारः अक शब्दो वा स्वभावतः कर्त्तारं ब्रुवन्कृत्संज्ञश्च भवति प्रत्ययसंज्ञश्चेति कश्चात्र विशेषः तत्र प्रत्ययनियमे ऽनिष्ट प्रसंगः तत्र प्रत्ययनियमे सत्यनिष्टं प्राप्नोति काष्ठभिद् ब्राह्मणः वलभिद् ब्राह्मणः एषोपि नियोगतः कर्त्तारं ब्रुवन् कृत्संज्ञश्च स्यात् प्रत्ययसंज्ञश्चेति संज्ञानियमो सिद्धं संज्ञानियमे सति सिद्धं भवति ॥ ॥

यत्प्रार्द्धधातुकनिमित्तो गुणः प्राप्नोति ननु नायं धातोर्विहितः ततो दोषाभावः नैतदस्ति लक्षणवशाच्छब्दार्थसंबंधव्यवस्थानुविधाने कुतोयं नियमः अयं धातोर्विहितो नान्य इति । काष्ठशब्दो हि कर्म्मोपपदं भिदिर्धातुः तस्माच्च परो ऽकार इति तस्य कर्त्तरि स्यादेव नियोगः । यदा हि स्ववाक्ये विहितानां प्रत्ययानाम नेनार्थविशेषे नियोगः क्रियते तदा विशेषाभावादस्यापि नियोगः प्राप्नोति क्रियोत्पत्त्या द्वानुरेव कर्त्तर्येनियुक्त इस कारस्य कर्त्तर्यो न भविष्यतीति चेत् यावकादिष्विवस्वो ऽभिधानस्तु । लौकिकार्थानपेक्षायां हि धातोः परस्य कृत्प्रत्ययसंज्ञा कर्त्तरि नियोगप्रसंगः । संज्ञानियमे सतिसि

प्रत्ययनियमबाधामाह यदीति अत्र हि क्तः स्वभावतः कर्त्तारमाह। भ्रातृभिर्गोभिश्च सामानाधिकरण्यात् तस्य च कर्त्तरि साधुत्वं प्राप्नोतीत्यसाधुत्वं मन्यते क्रियाकारकसंबंधे न विभक्तादीनां कर्त्तरि वृत्तिरनभिमतेति दोषोपन्यासः। प्रकारान्तरेण साधुत्वं दर्शयिष्यते प्रत्ययनियमवादिनस्त्वयमदोषः गत्यर्थाकर्मकेत्यत्र परिगणिताभ्यः प्रकृतिभ्यः परः क्तः कर्त्तरि नियुज्यते नहि तत्र भजिपिबती परिगणितावित्यर्थः। संज्ञानियमबाधामाह विभक्तादिषु चेति यमापि गत्यर्थाकर्मकेति सूत्रं न रंडवारितं तत्र गत्यर्थादिभ्य एव क्तः स्वभावतः कर्त्तारं ब्रुवन्नकृतप्रत्ययसंज्ञो भवतीति भजिपिबतिभ्यां क्तस्य कर्त्तरि साधुत्वाप्रसंगः प्रकृतेरिति गत्यादिका या इत्यर्थः ॥

यदि संज्ञानियमो विभक्तादिषु दोषः विभक्ता भ्रातरः पीता गाव इति न सिध्यति प्रत्ययनियमे पुनः सति परिगणिताभ्यः प्रकृतिभ्यः परः क्तो नियोगतः कर्त्तारमाह न चेमास्तत्र परिगण्यन्ते प्रकृतयः विभक्तादिषु चाप्राप्तिः प्रकृतेः प्रत्ययपरवचनात् विभक्तादिषु च प्रत्ययनियमस्याप्राप्तिः किं कारणं प्रकृतेः प्रत्ययपरवचनात् परिगणिताभ्यः प्रकृतिभ्यः परः क्तः स्वभावतः कर्त्तारमाह न चेमास्तत्र परिगण्यन्ते नतर्हीदानीमयं साधुर्भवति भवति साधुर्न तु कर्त्तरि कथं तर्हि कर्त्तृत्वं गम्यते अकारो मत्वर्थीयः विभक्तमेषामस्तीति विभक्ताः पीतमेषामस्ति पीता इति अथवोत्तरपदलोपोत्र द्रष्टव्यः विभक्तधनाः विभक्ताः पीतोदकाः पीता इति ॥ ० ॥ ॥

प्रत्ययपरवचनादिति क्तप्रत्ययस्य कर्त्तरि वर्त्तमानस्य साधुत्वेन प्रतिपादनादित्यर्थः तदेवं स्थितमेतत् स्वभावतस्तेषु वर्त्तमानानां प्रत्ययसंज्ञाविधानद्वारेण साधुत्वमन्वाख्यायते इदानीं भाष्यकारः प्रसिद्धपूर्वकं प्रयोगसमर्थनं करोतीति नतर्हीति न तु कर्त्तरीति तयोरेवेति वचनात्कर्मण्येव साधुरित्यर्थः विभक्तमिति धनमिति भावः पीतमिति उदकमित्यर्थः आकृतिगणत्वादर्शआदिः अथवेति गम्यमानार्थस्य शब्दस्याप्रयोग एव लोपोभिमतः विभक्ता भ्रातर इत्यत्र च धनस्य द्वैधक्रियत्वं तद्भ्रातृषूपचर्यते पीता गाव इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते॥ ॥

भा० कै० ३ लः कर्मणि केचित्त्व इति प्रथमां व्याचक्षते अपरे तु षष्ठीं लस्य य आदेश इति तत्र लकारो द्विविधः तिङ्भावस्तिङ्भावीति तत्र तिङ्भाविनः लसंज्ञा निषेधा

१३५ त्कर्त्तरि कृदिति तस्यानुपस्थानात्स्वार्थे भावे विधानं प्राप्नोति अतिङ्भाविनस्तु कर्त्तरि कृदिति वचनात्कर्त्तर्येव साधुत्वं प्राप्नोतीति वचनं किमर्थमिति

135 वक्ष्यमाणोऽभिप्रायः लः एतेष्विति लकार इत्यर्थः अथवा लस्य य आदेश इति भावः भावकर्मणोरिति अस्त्वस्मिन्सूत्रे भावकर्मणोरात्मनेपदवि

धानात् शेषात्कर्त्तरीति च परस्मैपदविधानाल्लकारस्य भावकर्मकर्त्तारोऽर्था अनुमास्यन्ते लकारस्य प्रयोगासमवायाद्वात्मादेशानामेवैतेऽर्था भविष्यं

लः कर्मणि च किमर्थमिदमुच्यते लः एतेषु साधनेषु यथा स्यात् कर्मणि कर्त्तरि च भावे चाकर्मकेभ्य इति नैतदस्ति प्रयोजनं भावक
र्मणोरात्मनेपदं विधीयते शेषात्कर्त्तरि परस्मैपदं एतावांश्च लकारः य उक्तः परस्मैपदमात्मनेपदं च स चायमेवं विहितः अत उत्तरं प
ठति लग्रहणं सकर्मनिवृत्त्यर्थं लग्रहणं क्रियते सकर्मकनिवृत्त्यर्थं सकर्मकाणां भावे लो माभूदिति यदि पुनस्तत्रैवाकर्मकग्रहणं क्रि
येत तत्राकर्मकग्रहणं कर्त्तव्यं ननु चेहापि क्रियते भावे चाकर्मकेभ्य इति॥ ॥

तोऽसर्थः एतावानिति नन्वन्यविषयोऽपि लो विद्यते नैष दोषः तस्य लकारोपहरणात् अनुप्रयोगलकारेण भावादीनां प्रतिपाद्यत्वात् लग्रहणमिति य
दीदं नारभ्येत तदा यथा भावे विधीयमानाद् घञादयः सकर्मकेभ्योऽपि भवन्ति ओदनस्य पाकः सूत्रस्य कृतिरिति तथा भावकर्मणोरित्यनेन भावे आत्मनेप
दं सकर्मकेभ्योऽपि स्यात् ततश्च पच्यते यवागू देवदत्तेनेत्यपि स्यात् यदि पुनरिति भावकर्मणोरकर्मकादित्येवं करिष्यते सामर्थ्यादकर्मकग्रहणम् शप०
भावार्थे भविष्यति अकर्मकाणां कर्मासंभवात् सूत्रारंभवाद्याह तत्रेति। सूत्रप्रत्याख्यानवाद्याह ननु चेति त्वयापीति शेषः॥ श्री ॥ १३५

परार्थमिति सूत्रप्रत्याख्यानवादी आह यावदिहेति कर्मणि च भावे चाकर्मकेभ्य इत्येतद् ग्रहणाभ्यामपि वृत्तमं लयातुल इत्येतत्तदर्थमत्र कर्त्तव्यं यथा भावकर्मणोरित्यत्रा कर्मग्रहणमितिपदेन पदस्य सामर्थ्यात् लाघवं त्वत्र न विवक्षितं आरंभवादी आह अयमस्तीति आन इति आत्मनेपदसंज्ञस्तत्रज्ञावकर्मणोरिति वचनाद्भावकर्माभि धायित्वमेवस्यात् न तु कर्त्तृवाचित्वमिति शयान इत्यादौ कर्त्तर्यात्मनेपदं स्यात् सूत्रारंभे तु कर्त्तर्यप्यानस्ति भविष्यतीत्यर्थः प्रत्याख्यानवादी आह तत्रापीति अनुदात्तङित इत्यादिभिः सूत्रैः कर्त्तर्यात्मनेपदविधानार्थैः आनः कर्त्तरि शयान इत्यादौ भविष्यतीत्यर्थः विप्रतिषेधादिति भावकर्मणोरित्यस्यावकाशः यत्र कृत्स्नं शायाद्य

परार्थमेतद्भविष्यति तयोरेव कृत्यक्तखलर्थाः भावे चाकर्मकेभ्य इति एवं मपि यावदिह लग्रहणं तावत्तत्राकर्मकग्रहणं क्रियते तत्र वाकर्मकग्रहणं कोन्वत्र विशेषः अयमस्ति विशेषः इह लग्रहणे क्रियमाणे आनः कर्त्तरि सिद्धो भवति तत्र पुनरकर्मकग्रहणे क्रियमाणे आनः कर्त्तरि न प्राप्नोति न त्वाप्यकर्मकग्रहणे क्रियमाणे आनः कर्त्तरि सिद्धो भवति कथं भावकर्मणोरित्यतो परस्मैपदात्मनेपदानुक्रमणं तत्र सर्वकर्त्रर्थं विप्रतिषेधादानः कर्त्तरि विप्रतिषेधाद्धानआनः कर्त्तरि भविष्यति तत्र भावकर्मणोरित्येतदस्य कर्त्तरि कृदिति। कर्त्तरि कृदित्येतद्भविष्यति विप्रतिषेधेन सर्वप्रसंग स्य सर्वेभ्योऽपि धातुभ्यः आनः कर्त्तरि प्राप्नोति परस्मैपदिभ्योऽपि नैष दोषः अनुदात्तङित इत्येष योगो नियमार्थो भविष्यति यद्येष योगो नियमार्थो विधिर्न प्रकल्पते आस्ते शेत इति अथ विध्यर्थः आनस्य नियमो न प्राप्नोति आसीनः शयान इति तथानेर्देशात् सेवमाद्यनुक्रम
ेणं यदि नियमार्थं विधिर्न प्रकल्पते अथ विध्यर्थः। आनस्य नियमो न प्राप्नोति॥ ॥

भावात् कर्त्तरि कृदिति न प्रवर्त्तते आस्ते पच्यत इति कर्त्तरि कृदित्यस्यतज्जातयोवकाशः आनस्य तु सर्वप्रसंगे कर्त्तरि कृदिति परत्वात् कर्त्तर्थो भविष्यतीत्यर्थः प्रत्याख्यानभवादी आह नैष दोष इति अनुदात्तङित आत्मनेपदं नान्यस्मादिति नियमादानः कर्त्तरि परस्मैपदिभ्यो न भविष्यतीत्यर्थः आरंभवादी आह यदीति भावकर्मणोरात्मनेपदविधानात्तङोनुदात्तङितो न प्राप्नुवन्ति अनुदात्तङित इत्यनेनानन्तरं धातुविशेषे नियम्यत इत्यर्थः कृतादेकस्यवाक्य

प्रत्याख्यानवाद्याह अस्त्वन्तर्हीति भावकर्मणोरित्यत्रेति अनुदात्तङित इत्यात्मनेपदमित्यनेनैकेन वाक्येनानस्य नियमः क्रियते भावकर्मणोरित्यत्रत्वनुवर्त्या द्वितीयेन वाक्येन तङो विधिः क्रियत इत्यर्थः एवमपीति भावकर्मणोरित्यस्यानुदात्तङि० तद्वत्सनेनैकवाक्यतास्य सामनुवर्त्तते स्यात् ततश्चास्यतेगुरुत्वात् अति शप्यतेगुरुरित्यादौ आत्मनेपदं स्यात् भूयतेगम्यतेशेते आस्त इत्यादौ तु नैवाप्त्यादिरित्यर्थः यथोवात्रेति अनुदात्तङि. तद्वत्सनेनानस्य नियमादप्राप्तिः

अस्तु तर्हि नियमार्थो। ननु चोक्तं विधिर्न प्रकल्पत इति विधिश्च प्रकृप्तः कथं भावकर्मणोरित्यत्र अनुदात्तङि. तद्वत्सेतरदनुवर्त्तिष्यते यद्यनुवर्त्तते एवमप्यनुदात्तङि. त एव भावकर्मणोरात्मनेपदं प्राप्नोति एवं तर्हि योगविभागः करिष्यते अनुदात्तङि. तआत्मनेपदं भवति ततो भावकर्मणोः ततः कर्त्तरि कर्त्तरि चात्मनेपदं भवति अनुदात्तङि. तद्वत्सेव आस्ते शेते भावकर्मणोरिति निवृत्तं ततः कर्मव्यतिहारे कर्त्तरीत्येवानुवर्त्तते अनुदात्तङि. तद्वत्सपि निवृत्तं यदप्युच्यते नेर्विश इत्येवमाद्यनुक्रमणं यदि नियमार्थो विधिर्न प्रकल्पते। अथ विध्यर्थमानस्य नियमो न प्राप्नोति अस्तु विध्यर्थं ननु चोक्तं आनस्य नियमो न प्राप्नोतीति नैष दोषः यथैवात्रा प्राप्तस्तङो भवं सेवमानोपि भविष्यति सर्वत्राप्रसंगस्तु सर्वेषु साधनेष्वानो न प्राप्नोति विप्रतिषेधाद्वानः कर्त्तरीति भावकर्मणोर्न

॥ स्यात् कर्त्तर्येव स्यात्॥ ॥ श्री ॥१०५.

तङोपि भावकर्मणोर्विधीयमानाः निविशत इत्यादौ कर्त्तरि न प्राप्नुवन्ति तत्राविशेषान्नेर्विश इत्यादिभिः सूत्रैस्तङानाः कर्त्तरि विधास्यन्त इत्यर्थे सर्वत्रा प्रसंगस्त्विति असमस्मिन् सूत्रे भवदुक्ते विप्रतिषेधेनानः कर्त्तरि स्यादिति कर्त्तर्येव स्यात् न तु भावकर्मणोः। तत्र च भूयमानं गम्यमानमित्यादिप्रयोगो न स्या- राम०

इह पुनरीति यदि ल इति षष्ठी तदास्य तिङोऽवकाशः कर्त्तरि कृदिति सप्तम्यादयः। अनस्य परत्वादनेनार्थनिर्देशः अथ ल इति प्रथमा तदास्य तिङ्ग्रवील्ल
कारोऽवकाशः। अनभाविनस्तु लकारस्य परत्वादनेनार्थव्यवस्था शेषा इति कर्त्तर्ये वृपरस्मैपदमित्येवं नियमात् शानच्क्सू भावकर्मणोर्नेभविष्यत इति भावः
ल इत्यादेशापेक्षषष्ठी। निर्देशपक्षे आम इति विधीयमानस्य लुकोऽप्ययमर्थनिर्देशः अभावस्याप्यादेशत्वात्। तथा वाचः परस्मिन्पूर्वविधावित्यत्र लोपस्या

इह पुनर्लग्रहणे क्रियमाणे कर्त्तरि कृदित्येतदस्तु लः कर्मणि च भावे चाकर्मकेभ्य इति लः कर्मणि च भावे चाकर्मकेभ्य इत्येतत्तु भविष्यति
विप्रतिषेधेन सर्वप्रसंगस्तु लादेशः सर्वेषु साधनेषु प्राप्नोति शानच्क्सूच भावकर्मणोरपि प्राप्नुतः नैष दोषः शेषात्कर्त्तरि परस्मैपदं
कर्त्तरीत्येवं तौ कर्त्तारं ह्रियेते लस्य लादेशे सर्वप्रसंगोऽविशेषात् लादेशे सर्वस्य प्रसंगः सर्वस्य लकारस्यादेशः प्राप्नोति अस्यापि प्राप्नोति लुना
तिल भवते किंकारणम् अविशेषात् न हि कश्चिद्विशेष उपादीयते एवंजातीयस्य लकारस्यादेशो भवतीति अनुपादीयमाने विशेषे सर्वप्रसंगः
अर्थवद्ग्रहणात्सिद्धं अर्थवतो लकारस्य ग्रहणं न चैषोऽर्थवान् अर्थवद्ग्रहणात्सिद्धमिति चेन्न वर्णग्रहणेषु अर्थवद्ग्रहणात्सिद्धमिति चेत्तन्न किं
कारणं वर्णग्रहणमिदं न चैतद्वर्णग्रहणेषु भवत्यर्थवद्ग्रहणे नानर्थकस्येति॥ श्री ॥७॥ ॥७॥

प्यजादेशस्य स्थानिवद्भावः प्रदर्शितः। लुकोऽभावरूपत्वात् कथमर्थाभिधानमिति चेत् प्रतिज्ञापितं क्विवादीनामिव प्रयोगेऽश्रवणेऽपि लुकोऽर्थवत्त्वं अनुमयोगानुत्तरथो
भिधानव्यक्तिरिसदोषः लस्य अर्थवद्ग्रहणादिति लडादय एवभावाद्यर्थाभिधायिनः स्थानित्वेन गृह्यन्त इत्यर्थः न वर्णग्रहणेष्विति लस्येत्यत्र लकारेऽकार उच्चारणार्थः।
ततश्च वर्णमात्रस्यायं निर्देशः वर्णनिर्देशेषु च विद्यमानाप्यर्थवत्ता शब्दे न नाश्रिता वर्णरूपमात्रस्याश्रयणात् तथा चयस्येति लोपोऽनर्थकस्यापि भवति हैवदन्निरिति॥०॥

तस्मादिति भावाद्यर्थाभिधायिनो लस्येति वक्तव्यमित्यर्थः धातोरिति वर्त्तत इति विहितविशेषणं च धातुग्रहणमाश्रीयते इस ग्निचिद्ध्वमत इत्यत्रापि न भवति श्र
स्तेति शोमामसिध्यत्वौ णादिकोल्लन् प्रत्ययः इत्यंतात्रेति तस्यां च सत्यां लोपे कृते स्थान्यभावादलिविधित्वाच्च स्थानिवद्भावाभावादेशो न भविष्यतीत्यर्थः इ
हापीति ततस्त्वाताप्यादेशानस्युरित्यर्थः लितीमुच्यत इति लइदस्येति वक्तुर्व्रीहिराश्रितः अत्र तु चलस्य लोपे कृते न कश्चिल्लकारो इत्यंतकः प्रत्ययो स्तीत्यर्थः
शा२

तस्माद्विशिष्टग्रहणं तस्माद्विशिष्टस्य लकारस्य ग्रहणं कर्त्तव्यं न कर्त्तव्यं धातोरिति वर्त्तते एवमपि शालामालामश्च इत्यत्रापि प्राप्नोति
उणादयोः त्वसन्तानि प्रातिपदिकानि एवमपि नंदनरइत्यत्रापि प्राप्नोति इत्यंतात्र बाधिका भविष्यति इहापि तर्हि वाधेता पचतिपठतीति
इत्कार्याभावादत्रेत्यंतानभविष्यति इदमस्तीत्कार्यं लितिप्रत्ययात्पूर्वमुदात्तं भवति इत्येष स्वरो यथा स्यात् लितीत्युच्यते न चात्र लितं पश्या
मः अथापि कथंचिद्वचनात्त्वर्त्तेमा द्वा इत्यंतकानामादेशः स्यात् एवमपि न दोषः आचार्यप्रवृत्तिर्ज्ञापयति नलादेशो वुलितःकृतं
भवतीति यदयं णाल्ललितं करोति अथाप्युणादयो व्युत्पाद्यंते एवमपि न दोषः॥ ॥ श्री ॥

अथापीति लएवेत् लिदिसंवंतस्मुरुत्रोयथाश्रीयेतत था लस्येति स्थानित्वेनाश्रयणात्तस्यामपि इत्संज्ञायां लोपो न क्रियते अनुवर्त्तनादेभावादीनामनु
वृत्त्यभावकमेकत्वाद्विनो लस्यादेशः न च लोपे सति भावाद्यर्थाभिधायित्वं तं भवतीत्यकृतलोपानामेव लकाराणामादेशः करिष्यते ज्ञापकात्तु लित्व राम०
ऐन भविष्यतीत्यर्थः॥ ॥श्री ॥७॥ ॥ १३७

क्रियत इति अनुनासिको लकारः स्थानित्वेनोपात्त इत्यर्थः अथवा लृ इत्यस्य लस्येत्येव निर्देशः कृतः अस्येति सर्वेनाम्नाभावाद्यथोपि ध्यायीपराम्रश्यते पचतत्वेत्ति वा
कापस्यविभज्यात्वाख्यानं क्रियत इत्येवमुपन्यासः लादेशो वर्णविधेरिति विप्रतिषेधसूत्रे वहिरंगपरिभाषाया इदं प्रयोजनमित्यर्थः ॥ पद्येवमिति परिदितइत्येकव
चनं बहुवचन प्रसंगे व्यत्यये न क्रियेते त्यर्थः अथवाके चिदित्ता मित्येव पठंति तदाश्रये गौतदुत्तम् अकुर्वीति लङः स्थाने उत्तमैकवचनमिट् पर्येवपाद्यस्येति पर्येवपाद्ये

क्रियते विशिष्टग्रहणं लस्येति लादेशो वर्णविधेः पूर्वविप्रतिषिद्धं लादेशो वर्णविधेर्भवति पूर्वविप्रतिषेधेन लादेशस्यावकाशः पचतु पठतु वर्णविधेरवका
शः दध्यत्र मध्वत्र इहोभयं प्राप्नोति पचत्वत्र पठत्वत्रेति लादेशो भवति पूर्वविप्रतिषेधेन स तर्हि पूर्वविप्रतिषेधो वक्तव्यः नवक्तव्यः उक्तं वा किमुक्तं ला
देशो वर्णविधेरंतरंग इति टित टित एत्वे आत्मनेपदेष्वानप्रतिषेधः टित एत्वे आत्मनेपदेष्वानस्य प्रतिषेधो वक्तव्यः पचमानः यजमानः टित इत्येत्वं प्राप्नोति
उक्तं वा किमुक्तं ज्ञापकं वा सानुबंधकस्यादेशवचनं इत्कार्याभावस्येति नैतदस्त्युक्तं एवं किलतदुक्तं स्यात् यद्येवं विज्ञायेत टितः आत्मनेपदं टिदात्मनेपदं टिदा
त्मनेपदानामिति तत्तु नं टितो लकारस्य यान्यात्मनेपदानीत्येवमेतद्विज्ञायते अवश्यं चैतदेवं विज्ञेयं टितः आत्मनेपदं टिदात्मनेपदं टिदात्मनेपदानामिति
हि विज्ञायमाने अकुर्वि इत्यत्रापि प्रसज्येत नैष दोषः टितः कस्तर्हि ठित सचावश्यं पठितः सचावश्यं पठितव्यः आदिर्मोभूदिति कथमिटो दिति इष्टे दितिवक्ष्या
मीति तच्चावश्यं वक्तव्यं पर्येवपाद्यस्यमाभूत् लविषीष्ट इहतर्हि इषमूर्जमहमितआदीत्याटोलोप इटि चेत्याकारलोपो न प्राप्नोति तस्मादिदेषः आदिस्तर्हि कस्मा
न्न भवति सप्तदशादेशस्थाने योगत्वं प्रयोजयंतितानेको नोत्सहते विहंतुमिति कलात आदिर्न्न भविष्यति पर्येवपाद्यस्य तर्हि कस्मान्न भवति लविषीष्ठेति ॥ ० ॥

रूपांतरापत्तिः तत्रासाधुरागमः पर्येवपाद्युः तत्रसाधुरितियत् आदीति हाम्रोलटः उत्तमैकवचनं शपः लुक् द्विर्वचनप्रसंगे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः यदि टिदित्
स्यात् तदा आतो लोप इटि चेत्याकारलोपो न स्यात् अत्र च छंदस्युभयथेत्यार्धधातुकत्वमिट एष्टव्यं आर्धधातुकइत्यालोपविधानात् सप्तदशेति लस्येत्येका षष्ठी सायद्यवय
वावयविसंबंधे स्यात् तदा इट एवानुग्रहः स्यात् नतिवादीनां तस्मादूपसां स्थान्यादेशसंबंधस्य प्रयोजकत्वाल्लस्येति स्थानेयोगा षष्ठी सा देशएवेड् भवतिमित्वागमः ॥ ० ॥

भा॰कै॰३ असिद्धमिति वलाद्यार्धधातुकापेक्षणादंगापेक्षत्वाच्च बहिरंग इडागमः इटो दित्सद्भावस्तन्निरूपसंबंधी उपेक्षणादंतरंगः तत्र कर्त्तव्ये आगमस्यासिद्धत्वादा
१३८ वाभावः प्रकृतानामिति तिबादय इहानुवर्त्तंते तैरात्मनेपदानि विशेष्यंते अथवा प्रकरणस्य विशेषणस्य त्तिहेतुत्वात्प्रकृतानामेवात्मनेपदानीहात्मनेपदशब्देनो
138 च्यंते ज्ञापकमथाह आनेमुगिति यद्येवमानस्य स्यात् आनेमुगिति वक्तव्यं स्यादित्यर्थः टित्तङामिति टितः स्थाने ये तङ स्तेषामेत्वं नत्वानस्यापि अथा
धेतेसाहे इत्यादौ रसामेत्वं कस्मान्न भवतीत्याह इशिसीरिच इति लिटस्तझयोरेशिरेच् थासः से इत्येताभ्यां सूत्राभ्यां लाघवाय इ शसि इरिच् इत्येते आदेशा विधेयाः ए

असिद्धं बहिरंगलक्षणमंतरंगलक्षण इति इदं तर्ह्युक्तं प्रकृतानामात्मनेपदानामेत्वं भवती
ति के च प्रकृताः तादयः आनेमुक् ज्ञापकं ले टित्तङामिशिरिचः इत्यादेः सुटिदटितः प्रकृ
तेन तत् गुणे कथं परस्मैप एल्लः शित्करणं सर्वादेशार्थं णल् शित्करणमः किं प्रयोजनं स
र्वादेशार्थं शित् सर्वस्येति सर्वादेशो यथा स्यात्॥ ॥ श्री ॥

त्वस्याने नसिद्धत्वात् ज्ञापनाय तु तयोर्विहितालादेशानामेत्वाभावस्य टिट्टित इति अकुर्वीत्यत्र परिहारः अरितोलङः स्थाने टिदित्कृत इत्येत्वं न भव
ति प्रकृतेनेति तदेत्वं प्रकृतेनेतत्स्यादात्मनेपदे भवति नत्वाने गुणे कथमिश्लोकस्य रणायेत उक्तं एतएइ स्वत्र पचावेदमिसादुणोक्तेते कथमेत्वं न भवतीति चो
द्यम् परिहारस्तु वक्ष्यते बहिरंग आद्गुण इति अस्ये णल इति कपुनरस्य शकारः क्रियते यथादौ णकारस्थानादिनादित्वादित्संज्ञा न प्राप्नोति मध्ये शस्ये एम॰
त्संज्ञायाअभावः अंते तु लस्येत्संज्ञायाअप्रसंगः एवं तर्हि लस्य विधानव्यः लमुत्तमो वेति करिष्यते योगविभागश्चेति मन्यते अथवा णल्शिदित्सतिदेशः कर्त्तव्यः॥ ॥ १३८

अक्रियमाणे हीति नानुबंधकृतमनेकाल्त्वमिति संस्त्रस्य स्यादित्यर्थः एतच्च शास्त्रादेशाद्वात्वधिकार इति पक्षमाश्रित्योच्यते धात्वधिकारेतु सस्यादेः परस्येत्यादेः शास्त्रो
ति धातुस्वर इति प्रत्ययस्यपित्वादनुदात्तत्वाद्धातुः स्वरः प्रवर्तते यदेकाजिति यो नेकाच् जजागारेति तत्र धातुस्वरे कृते शिष्टस्यानुदात्तत्वे मध्यमैकाचो द्विर्वचु

अक्रियमाणेहि शकारे अप्लोः सस्य विधयो भवंतीत्येतत्प्रसज्येत उक्तं वा किमुक्तं अनित्त्वात्सिद्धमिति णाकारः क्रियते तस्मान्नित्त्वात्सि
द्धमिति कथमेष परिहारो न्याय्यः शकारमशिचोदितः णाकारं करिष्यामि शकारं न करिष्यामीति णाकारो वात्र क्रियेत शकारो वा कोन्वत्र विशेषः अ
वश्यमत्र णाकारो रक्षार्थः कर्तव्यः णितीति वृद्धिर्यथा स्यात् नार्थो वृद्ध्यर्थेन णकारेण णित्वे योगविभागः करिष्यते इदमस्ति गोतो णित् ततः अ
ल् अलन्त्यणिद्भवति ततउत्तमो वेति एवं तर्हि लकारः क्रियते तस्मान्नित्त्वात्सिद्धं एवमपि कएष परिहारो न्याय्यः शकारमशिचोदितः लकारं
करिष्यामि शकारं न करिष्यामीति लकारो वा क्रियेत शकारो वा कोन्वत्र विशेषः अयमस्ति विशेषः अवश्यमत्र स्वरार्थो लकारः कर्तव्यः लिति
प्रत्ययात्पूर्वमुदात्तं भवतीत्येष स्वरो यथा स्यात् नैतदस्ति प्रयोजनं धातुस्वरे कृते द्विर्वचनं तत्रांतर्यतोऽतोदात्तस्यांतोदात्त आदेशो भविष्यति
कथं पुनरयमंतोदात्तः स्यात् यदेकाच् भपदेशिवद्भावेन यथैव तर्हि भपदेशिवद्भावेनांतोदात्तः एवमाद्युदात्तोपि तत्रांतर्यत आद्युदात्त आ
देशः प्रसज्येत। सत्यमेवं तत् नत्विदं लक्षणमस्ति धातोरादिरुदात्तो भवतीति इदं पुनरस्ति धातोरंत उदात्तो भवतीत्येषोयं लक्षणेनांतोदात्तः तत्रांतर्य
तोंतोदात्तस्यांतोदात्तः आदेशो भविष्यति॥ ॥ ॥

नं सर्वानुदात्तं सिद्ध्यतीत्येकाजेव धातुर्निरूप्यते भपदेशिवद्भावेनेति आद्यं तवरेक
स्मिन्निसनेनेत्यर्थः यथैवेति कार्यातिदेशं मन्यते नत्विदमिति शास्त्रातिदेश इति भावः॥ श्री ॥८॥ ॥श्री ॥

एतदपीति स्थानिवदिति कार्यातिदेशः प्राधान्यादिति भावः प्रकृतितद्इति स्थानितद्इत्यर्थः द्विःप्रयोग इति षाष्ठिकं द्विर्वचनं द्विःप्रयोगः ननु स्थाने द्विर्वचनमिति निर्णयः लकारइति तत स्थल उत्तमो वेति कर्तव्यं योगविभागश्च कार्यः अकारस्येति यः यस्य स्थाने विधीयते त स्येत्यर्थः। स्थालधिकार इति पक्षाश्रये णोच्यते धात्वधिकारे परस्मादेरकारे सति सिद्धं रूपं अअइति अकारद्वयसमुदायस्य यादेशात्व मित्यर्थः। लोटो लोट इत्युपमेयषष्ठी निर्देशाउ

एतदप्यादेशो नास्ति आदेशस्यां तउदात्तो भवतीति प्रकृतितोः नेन स्वरे लभ्यः प्रकृति स्वास्य पर्षे वांतोदात्ता एव माद्युदात्तापि द्विःप्रयोगे एव त्वपि द्विर्वचने उभयोरंतोदात्तत्वं प्रसज्येत अनुदात्तं पदमेकवर्जमिति नास्ति यौगपद्येन संभवः पर्यायः प्रसज्येत तस्मात्स्वरार्थो लकारः कर्तव्यः लकारः क्रियते तस्मान्नित्वान्निसिद्धं अकारस्य शित्करणं सर्वादेशार्थं अकारः शित् कर्तव्यः किं प्रयोजनं सर्वादेशार्थं शित्सर्वस्येति सर्वादेशो यथा स्यात् अक्रियमाणे हि शकारे अलोंत्यस्य विधयो भवंतीत्यंत्यस्य प्रसज्येत ननु चाकारस्याकारवचने प्रयोजनं नास्तीति कृत्वाऽन्तरेण शकारं सर्वादेशो भविष्यति अन्त्यस्य दकारस्याकारवचने प्रयोजनं किं अकारवचनं समसंख्यार्थं संख्यानुदेशो यथा स्यात् तस्माच्छित्करणं तस्माच्छित्कर्तव्यः न कर्तव्यः क्रियते न्यास एव। प्रश्लिष्टनिर्देशो यं अअइति सोसावने कालू अनेकाल् शित्सर्वस्येति सर्वादेशो भविष्यति परस्मै लोटो लङ्ः त ल्ङ्व.द तिदेशो जुस्भावप्रतिषेधः लङ्.इतिदेशे जुसभावस्य प्रतिषेधो वक्तव्यः यान्तु वान्तु लङः शाकटायनस्यैवेति जुस्भावः प्राप्नोति उत्ववचनात्सिद्धं उत्वमत्र बाधकं भविष्यति अनवकाशा हि विधयो बाधका भवंति

१९ सावकाशं चोत्वं कोवकाशः पचतु पठतु॥०

पमानं पक्षं तं विज्ञायते तेन लङः पकार्यंत ल्लोटो तिदिश्यते ननु लदिः यत्कार्यं तदिस इति लोटि न भवतः

उत्ववचनादिति नाप्राप्तेल्ङ्.प्राप्ते उत्वमारभ्यमाणं तस्य बाधकमित्यर्थः॥ ॥श्री ॥ ॥ ॥श्री ॥ ॥ ॥

अत्रापीति लङ्डावादित श्चेत्सने नेत्यर्थः सेर्ध्य अलघीयइति उकारे सति प्रक्रियायां लाघवं भवति इकारे तु सति लक्षणांतरेण त्वेप्रक्रियागौरवं स्यात् नचेकारोच्चारणोत्ला घवं भवति तस्मादिकारोच्चारणमुत्सस्वबाधकमेवेत्यर्थः लिटः सीयथैवृक्षीष्ट कृषीष्टादरसेव मादौ सुटि कृते विरोधाभावाद्दाध्यबाधकभावाभावात्सीयुडूवति एवं या

अत्रापीकारलोपः प्राप्नोति तद्यथैवोत्वमिकारलोपं बाधते एवं जुसभावमपि बाधेत नबाधते किं कारणं येन नाप्राप्ते तस्य बाधनं भवति नचाप्राप्त इकारलो पेउत्वमारभ्यते जुसभावेपुनः प्राप्ते चाप्राप्ते च अथवा पुरस्तादपवादा अनंतरान्विधीन्बाधंते इ सेवमिदमुत्वमिकारलोलोपं बाधते जुसभावंन्नबा धते एवं तर्हि वक्ष्यति तत्रलङ्ग्रहणस्य प्रयोजनं लङे वयोल्लङ् तत्रयथास्यात् लङ्डावेन्योल्लङ् तत्रमाभूदिति लोटो सेर्ध्यपिच्चमे न्निः हिन्योरुत्व प्रतिषेधः हिन्योरुत्वस्यप्रतिषेधोवक्तव्यः लुनीहि लुनानि एहीसुत्वं प्राप्नोति नवोच्चारणसामर्थ्यात् नवावक्तव्यः किं कारणं उच्चारणसामर्थ्यात् उच्चारणसामर्थ्यादत्रोत्वंन भविष्यति अलघीयश्चेवहि इकारोच्चारणं उकारोच्चारणात् इकारं चोच्चारयति उकारं च नोच्चारयति तस्मैतत्प्रयोजनं उत्वमा भूदिति सेर्ध्यपिच्च एतऐ एतऐलव्आडुणप्रतिषेधः एतऐलेआडुणस्य प्रतिषेधो वक्तव्यः पचावेदं पचामेदं आडुणे कृते एतऐ इसैत्वं प्राप्नोति नवा वहिरंगलक्षणत्वात् नवावक्तव्यः किं कारणं बहिरंगलक्षणत्वात् बहिरंगलक्षणाआडुणः अंतरंगमैत्वं असिद्धं बहिरंगमंतरंगे एतऐ लिटः सीयुट् यासुडादेः सीयुट्प्रतिषेधः यासुडादेः सीयुटः प्रतिषेधो वक्तव्यः चिनुयुः सुनुयुः लिटः सीयुडिति सीयुट् प्राप्नोति नवावाक्यापकर्षात् नवावक्तव्यः किं कारणं वाक्यापकर्षात् वाक्यापकर्षाद्यासुट्सीयुटं बाधिष्यते सुट्तिथोस्त्वपकर्षविज्ञानं सुटोपीदानीमपकर्षो विज्ञायेत कृषीष्टकृषीष्टाः हृषीष्टहृषीष्टाः॥

सुट्यपिकृते तस्य लिङः कृत्वात्तदादेः सीयुट्प्रसंगइतिमत्वाह यासुडादेरिति नचेतिलिङः सीयुडिसस्यवाक्यस्य यासुडुधिवाक्येनापकर्षो बाधइत्यर्थः विनापि विरोधेन सामान्यविधिर्विशेषविधिना बाध्यते तत्केणोवदधीति भावः॥ ॥श्री ॥ ॥ ॥

अनादेशेत्विति तियोरिति सप्तमी मन्यते ततस्तद्वादि विधिसद्भावात्तकारथकारादेरेव लिङादेशस्य सुट्स्यात्तत्कृषीष्ठी इत्यादाविति भावः नवेति चोद्यहृदय

अन्यादेशस्य सुट् कृत्यः कृषीयास्तां कृषीयास्थां तकारथकारादेर्लिङः इति सुट् प्राप्नोति नवाति थोः प्रधानभावान्नद्विशेषणं लिङ्ग्रह
णं न वाव कृत्यं किं कारणं तिथोः प्रधानभावात् ति यावत्प्रधानं तयोर्विशेषणं लिङ्ग्रहणं नैवं विज्ञायते तकारथकारादेर्लिङ् इति कथं
तर्हि तकारथकारयोः सुट् भवति तौ चेल्लिङः इति लिङः सीयुट् यासुट् परस्मैपदेषूदात्तो ङिच्च किमर्थं यासुटो ङित्वमुच्यते यासुटो
ङिद्वचनं पिदर्थं पितिवचनानि प्रयोजयन्ति अथ किमर्थमुदात्तवचनं क्रियते उदात्तवचनं च किं पिदर्थमेव आगमानुदात्ता
र्थं चा अथवा एतत् ज्ञापयत्याचार्यः आगमा अनुदात्ता भवन्तीति अस्त्यस्मिन् प्रयोजने ज्ञापकं भवति उक्तं चैतत् यासुटो
ङिद्वचनं पिदर्थं उदात्तवचनं चेति शक्यमनेन वक्तुं यासुट् परस्मैपदेषु भवति अपिच्चलिङ् भवतीति सोयमेवं लघीयसा न्या
सेन सिद्धे सति यत् गरीयांसं यत्नमारभते ततः ज्ञापयत्याचार्यः आगमा अनुदात्ता भवन्तीति यासुट्॥ श्री ॥

मपि परिहृतं सुट् स्तकारथकारावागमिनौ सीयुटस्तु समुदाय इति कार्यिभेदात् बाध्यबाधकभावाभावः तिथोरिति च षष्ठी निर्देशस्तद्वादिविध्यभावा एम०
९ इत्यादौ परिति थोः सुट्भवति॥ श्री ॥ श्री ॥ १४०

आतः अकार्षुरिति अत्र नाकारान्तात्सिज्विहितः नापि परः रेफेणाव्यवधानादिति जुस्न स्यात् ननु यद्यकार्षुरित्यादावपि नियमः स्यात्तदा पूर्वसूत्रेणासिजन्ता-
ज्जुस्विधानमनवकाशं स्यात् नैष दोषः अगुरस्थुरित्यादेरवकाशस्य संभवात् । विषयविभागश्च न लभ्यते यतोऽकार्षुरिति जुस्भवति अभूवन्निति

आतः किमिदं जुस्याकारग्रहणं नियमार्थं आहोस्वित् प्रापकं कथं च नियमार्थं कथं च प्रापकं
यदि सिज्ग्रहणमनुवर्त्तते ततो नियमार्थं अथ निवृत्तं ततः प्रापकं कश्चात्र विशेषः जुस्या-
कारग्रहणं नियमार्थमिति चेत् सिज्लुक्ग्रहणं जुसि आकारग्रहणं नियमार्थमिति चेत् सि-
ज्लुक्ग्रहणं कर्त्तव्यं आतः सिज्लुगन्तादिति वक्तव्यं इह माभूत् अकार्षुः अहार्षुः अस्तु तर्हि
प्रापकं प्रापकमिति चेत् प्रत्ययलक्षणप्रतिषेधः प्रापकमिति चेत् प्रत्ययलक्षणस्य प्रतिषे-
धो वक्तव्यः अभूवन्निति प्रत्ययलक्षणेन जुस्भावः प्राप्नोति ॥ ॥ ॥

ननु न भवति यद्येवं पूर्वसूत्रे सिज्ग्रहणमकृत्वा आतः सिच इति वक्तव्यं स्यात् नैतदस्ति उत्तरत्रातः स्यनुवृत्त्यर्थो योगविभागः स्यात् अथवा योगविभा-
गोऽस्य नियमार्थत्वाय स्यात् अस्य हि नियमार्थत्वे उत्तरत्र लङ्ग्रहणं न कर्त्तव्यं भवति ॥ ॥ ९ ॥ ॥

भा०कै०३ एवकारकरणं चेति यदा सिज्ग्रहणमिह नानुवर्त्तते तदा ‘‘नेनैवलङ्’’ इत्यादेशस्य हेतुः ‘‘जुसुत्तरस्याचुरिसाड्रौ जुसि सिद्धे लङः शाकटायनस्यैवेति नियमार्थे
१४१ एवकारः कर्त्तव्यः अन्येषां मते नञ्पानि स्यादिप्रयासात् यदा तु सिज्ग्रहणं नु वर्त्तसा नियमार्थमिदं लङः शाकटायनस्येत्येवपक्षे विध्यर्थे कर्त्तव्यं नार्थ एवका

141

एवकारग्रहणंच एवकारग्रहणंचकर्त्तव्यं लङः शाकटायनस्यैवेति नियमार्थो पुनः सतिनार्थ एवकारकरणेन ननुच प्रापकेपि
सति सिद्धे विधिरारभ्यमाणोंऽतरेणैवकारं नियमार्थो भविष्यति इष्टतोवधारणार्थं तर्ह्येवकारः कर्त्तव्यः यथैवं विज्ञायेत लङः शाकटाय
नस्यैवेति मैवं विज्ञायि लङ् एव शाकटायनस्येति किंचस्यात् लुङः शाकटायनस्य नस्यात् अदुः अधुः अस्थुः अभूवुः लङ्
ग्रहणंच। लङ्ग्रहणंच कर्त्तव्यं लङः शाकटायनस्यैवेति नियमार्थे पुनः सतिनार्थो लङ्ग्रहणेन आतोऽङितइति वर्त्तते न
चान्यआकारादनंतरोऽङित् इति अन्यदतो लङः अस्त्वतर्हि नियमार्थं ननुचोक्तं जुसाकारग्रहणं नियमार्थमिति चेत् सिज्लुक्
ग्रहणमिति। नैष दोषः तुल्यजातीयस्य नियमः कश्च तुल्यजातीयः योऽन्याम्यां मनेनतरः आतश्च सिचश्च अथ तदेवकारकरणं नै
९ वकर्त्तव्यं कर्त्तव्यंच किंप्रयोजनं ॥ • ॥

रेणोत्यर्थः मैवं विज्ञायीति लङ् एव शाकटायनस्येति विज्ञायमाने लुङः शाकटायनस्येति नस्यात् तत्र च लुङि विकल्पः प्रसज्येत लङि तु नित्यः स्यादित्यर्थः एम०
तुल्यजातीयस्येति सिज्लुकाविनाआतः सिचश्चानंतरोऽङिन्नभवतीतिसिज्लुगंतस्याकारांतस्येह ग्रहणमिति नियमेन सिज्लुगंतमेव निवर्त्तते ॥ ॥ १४१

उक्तार्थमिति अन्यथैकसंज्ञाधिकारादन्यत्रसंज्ञासमावेशस्य दृष्टत्वात् लुङ्लिङादेशानां सार्वधातुकसंज्ञापि स्यात् ततस्तन्निमित्तविकरणप्रसंगः आर्द्धधातु
कसंज्ञा चेड्ग्रहार्थास्यात् आर्धधातु अनुक्रान्तापेक्षमिति अनुक्रान्ता ये प्रत्ययास्तिङ्शिद्वर्जितास्ते आर्द्धधातुकसंज्ञा भवन्ति नत्वनुक्तसमाना इत्य

उक्तार्थे लिङ् लिङाशिषि आर्द्धधातुकमेव यथास्यात् इतरथा हि वचनादार्धधातुकसंज्ञा स्यात् तिङ्ग्रहणेन च ग्रहणात् सार्वधातुकसं
ज्ञा अथ तल्लङ्ग्रहणं नैव कर्त्तव्यं कर्त्तव्यं च किं प्रयोजनं लङेवयोल्लङ् तत्र यथास्यात् लङ्ङ् ज्ञो वेनयोल्लङ् तत्र मा भूत् इति आ
तः आर्द्धधातुके शेषः आर्द्धधातुकसंज्ञायां धातुग्रहणं आर्द्धधातुकसंज्ञायां धातुग्रहणं कर्त्तव्यं धातोः परस्यार्द्धधातुकसंज्ञा यथास्या
त् इह मा भूत् वृक्षत्वं वृक्षतेति क्रियमाणे चापि धातुग्रहणे स्वादिप्रतिषेधः स्वादीनां प्रतिषेधो वक्तव्यः इह मा भूत् लूभ्यां लूभिरिति अ
नुक्रान्तापेक्षं शेषग्रहणं एवमप्यग्निकाम्यति वायुकाम्यतीति प्राप्नोति तस्माद्धातुग्रहणं कर्त्तव्यं न कर्त्तव्यं आ तृतीयसमाप्तेर्धात्वधिकारः
प्रकृतोनुवर्त्तते क्व प्रकृतः धातोरेकाचो हलादेरिति एवमपि श्रीकाम्यति भूकाम्यतीति प्राप्नोति तद्विधानात्तिदं विहितविशेषणं धातुग्रहणं
धातोर्विहित इति धातोरेष विहितः संकीर्त्स्य धातोरित्येवं यो विहित इति॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये तृतीयाध्यायस्य चतु
र्थे पादे प्रथममाह्निकं॥ ॥

र्थः धातोरिति धातोरित्येवं धातुशब्दमुच्चार्य ये विहिता इत्यर्थः॥ ॥ इति श्रीकैय्यटे तृतीयस्याध्यायस्य चतुर्थे पादे प्रथमाह्निकं॥ ॥ श्री॥